# द्वितीयं सोपानम्

# ग्रहचाराध्यायः

**आदित्यचार :**

आदित्यः सर्वेषु ग्रहेषु प्रथमतया वर्णितः, अतः अत्रापि आरंभे आदित्यचारनिरूपणंप्रस्तुतं करोति। सूर्यस्य चारं अर्थात् भ्रमणं गतिं वा अवलम्ब्य ज्यौतिषशास्त्रविषयकाः के विशेषाः उद्भवन्ति। तेषां विवरणं आदित्याचारे कृतम्। यथा– प्रतिमासं सूर्यसंक्रमणं भवति। यदा सूर्यः कर्क राशौ भवति ततः आरभ्य षण्मासाः दक्षिणायनम् इति नाम्ना उल्लिख्यते। यदा च सूर्यः मकर राशौ प्रविशति तदा ततः आरभ्य षण्मासाः उत्तरायणम् इति उल्लिख्यन्ते। अनया रीत्या तस्य तस्य विशिष्टचारस्य निरुपणं विस्तरेण अस्मिन् द्वितीयसोपाने कृतं अस्ति।

प्रेरिता ग्रहाः अतिवेगेन , भास्कराचार्यनुसारेण , प्रवहनाम्ना वायुना सततं पश्चिमदिशां प्रति भ्रमणं कुर्वन्ति। किन्तु नक्षत्रैः पराभूताः तं स्व-स्व-कक्षायां पूर्व दिशांप्रति भ्रमणं कुर्वन्ति। अतः एतद् प्रमाणितं भवति यद् ग्रहाः पूर्वदिशां प्रति एव भ्रमणं कुर्वन्ति। स्वकक्षानुसारेण ग्रहाणां दैनिकगतिः भिन्ना-भिन्ना वर्तते। एवं दैनिकगतिं अवलंम्ब्य ग्रहाः राशिचक्रभोगं कुर्वन्तः भगणं प्रदक्षिणी कुर्वन्ति। शीध्रगतियुक्ताः ग्रहाः अल्पकालेन तथा मन्दगति-युक्ताः ग्रहाः बहुकालेन २६ नक्षत्राणि भुंजते। रेवतीनक्षत्रस्य अन्ते ग्रहणेन भगणः परिपूर्णः भवति। को नाम भगणः ? ग्रहेण नक्षत्रमंडलपरिभ्रमणे वा सूर्यंपरितः पूर्णपरिभ्रमणे चः कालः अतिक्रम्यते। स तस्य भगणः कालः अथवा परिक्रम कालः उच्यते। भगणकालः एव ग्रहाणां नक्षत्रकाल उच्यते। बुधस्य परिक्रमणकालः सर्वेभ्यः ग्रहेभ्यः अल्पकालिकः अस्ति बुधः२२ दिनानि एव सूर्यं परितः भ्रमति।

## १. आदित्याचाराः

**आश्लेषार्धाद्दक्षिणमुत्तरमयनं धनिष्ठाद्यम्।**
**नूनं कदाचिदासीद् येनोक्तं पूर्वशास्त्रेषु।।१।।**

यदुक्तं पराशरतन्त्रे- "श्रविष्ठाधात् पौष्णान्तं चरतः शिशिरः। वसन्तः पौष्णान्तादोहिण्यन्तम्। सौम्याद्यात् सार्पार्द्ध ग्रीष्मः। प्रावृट् सार्पार्द्धाद्धस्तान्तम्। चित्राद्यादिन्द्रर्द्ध शरद्धेमन्ता ज्येष्ठार्द्धाद्वैष्णवान्तमि ति।

**साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादिश्चान्यत्।**
**उक्त भावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः।। २।।**

साम्प्रतमिदानी युक्तं वा। सवितुरादित्यस्य। कर्कटकाद्यं कुलीरप्रथममेकमयनं मृगादितो मकारादितश्चान्यद् द्वितीयमुत्तरमयनम्। एवं कथितस्यार्थस्य यद्यभावोऽन्यथात्वं स्यात्तद्विकृतिर्विकारः। तत्र च प्रत्यक्षपरीक्षणैर्दृश्यमानैर्व्यक्तिः स्पष्टता भवति। विकृतेरुप-लम्भनमित्यर्थः।

**दूरस्थचिह्नवेधादुदगेऽस्तमयेऽपि वा सहस्त्रांशोः।**

**छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति।।३।।**

**अप्राप्य मकरमर्को विनिवृत्तो हन्ति सापरां याम्याम्।**

**कर्कटकमसम्प्रातो विनिवृत्तश्चोत्तरां सैन्द्रीम्।।४।।**

अर्क आदित्यो मकरमप्राप्य मकरमगत्वा यदि विनिवृत्तो व्यावृत्तस्तदा सापरां याम्यामपरया पश्चिमया यह सह दक्षिणां दिशं हन्ति। तत्स्थान् जनान्नाशयतीत्यर्थः। तथा कर्कटकं कुलीरमसम्प्रा-प्तोऽगतो यदि निवृत्तो भवति तदोत्तरामुदीचीं दिशं सैन्द्री सपूर्वां हन्ति। तत्स्थान् जनान्नाशयतीत्यर्थः। **बृ.सं.,पृ-६९**

यदा निवर्ततेऽप्राप्तो धनिष्ठामुत्तरायणे।

आश्लेषां दक्षिणेऽप्राप्तस्तदा विन्द्यान्महद्भयम्।।इति।।

तथा च **पराशरः**- "यद्यप्राप्तो वैष्णवमुदग्मार्गं प्रपद्यते। दक्षिणमाश्लेषां वा महाभयार्या इति।

**उत्तरमयनमतीत्य व्यावृतः क्षेमसत्यवृद्धिकरः।**

**प्रकृतिस्थश्चाप्येयं। विकृतगतिर्भयकृदुष्णांशुः।।५।।**

विकृतगतिर्भयकृदिति। विकृता सविकारा गतिर्यस्यासौ विकृतगतिः। तथाभूतो भयकृल्लोके भयं भीतिं करोति। अयननिवृतौ दृष्टायां पुनर्यदि प्रतीपगतित्वमर्कस्य दृश्यते तदा विकृतगतिर्ज्ञातव्या।

**सतमस्कं पर्व विना त्वष्टा नामार्कमण्डलं कुरुते।**

**स निहन्ति सप्त भूपान् जनांश्व शस्त्राग्निदुर्भिक्षैः।।६।।**

त्वष्टा नाम ग्रहोऽर्कमण्डलं सूर्यबिम्बं पर्व विनाऽपर्वण्येव सतमस्कं तमसान्धकारेण संयुक्त कुरुते स तु दृष्टः सप्त भूपान्नक्षत्रकूर्मोक्तानां नवानां नृपाणां मध्यात् सप्तसङ्ख्यान

भूपान् नृपान् निहन्ति घातयति। तथा शस्त्राग्निदुर्भिक्षैः शस्त्रेण सङ्ग्रामेणाग्निना हुतवहेन दुर्भिक्षेण च जनांल्लोकान् निहन्ति। तथा च भगवान् पराशरः- **बृ.सं.,पृ-७०**

अपर्वणि शशाङ्कार्को त्वष्टा नाम महाग्रहः।

आवृणोति तमः श्यामः सर्वलोकविपत्तये।।इति।

**तामसकीलकसंज्ञा राहुसुताः केतवस्त्रयस्त्रिंशत्।**

**वर्णस्थानाकारैस्तान् दृष्टार्के फलं ब्रूयात्।। ७।।**

राहुसुताः स्वर्भानुपुत्रास्त्रयस्त्रिंशत्केतवस्तामसकीलकसञ्ज्ञास्तामसकीलक इति तेषां नाम। तान् तामसकीलकानर्केऽर्कमण्डले वर्णस्थानाकारैः, वर्णाः, श्वेतादयः , स्थानं प्रवेशो बिम्बैकभागः, आकार आकृतिर्ध्वाङ्क्षादिसर्दशी, एतैंर्वर्णस्थानाकारैर्दृष्ट्वा अवलोक्य लोके जनपदे शुभाऽशुभफलमं ब्रूयाद् वदेत्।

**ते चार्कमण्डलगताः पापफलाश्चन्द्रमण्डले सौम्याः।**

**ध्वाङ्क्षकबन्धप्रहरणरूपाः पापाः शशाङ्केऽपि।।८।।**

**तेषामुदये रूपाण्यम्भः कलुषं रजोवृतं व्योम।**

**नगतरुशिखरविमर्दी सशर्करो मारुतश्चण्डः।। ९।।**

**ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहः।**

**निर्घातमहीकम्पादयो भवन्त्यत्र चोत्पातः।। १०।।**

तेषामिति। तेषां तामसकीलकानामुदये दर्शने रूपाण्येतानि लक्षणानि दृश्यन्ते। तद्यथाऽम्भः पानीयं निमित्तं विना कलुषमप्रसन्नम्। व्योम आकाशं रजोवृत्तं रजसा व्याप्तम्। तथा मारुतो वाश्चण्डः पुरुषो वाति वहति। कीदृशः। नगतरुशिखरामर्दी। नगानां पर्वतानां तरूणां वृक्षाणां शिखराण्यग्राणि। आसमन्तात् मर्दयति लोडयति। सशर्करः शर्कराभिर्मुत्कणिकाभिः सहितः।

तथा तरवो वृक्षा ऋतुविपरीताः। तेषां ऋतौ स्वकालकुसुमफलानामभवाः। अनृतौ कुसुमफलान्युत्पद्यन्ते। तथा मृगा अरण्यपशवः। पक्षिणः खगाश्च। दीप्ताः सूर्याभिमुखः दीप्तस्थाः परुषरवाश्च भवन्ति। दिशां दाहा दिग्दाहाश्चासकृद्दृश्यन्ते। अत्रस्मिंस्तामस् कीलकोदये निर्घातः। निर्धातलक्षणं वक्ष्यति।

महीकम्पो भुकम्पः। आदिग्रहणाद्रजोनीहारोल्कापातगन्धर्वनगराणि गृह्यन्ते। एते उत्पाता-भवन्ति ।

**न पृथक् फलानि तेषां शिखिकीलकराहुदर्शनानि यदि।**

**तदुदयकारणमेषां केत्वादीनां फलं ब्रूयात्।।११।।**

तेषामम्भः कलुषादीनामुत्पातानां पृथक् फलानि न भवन्ति। यदि शिखिनः केतोः। कीलकानां तामसकीलकानाम्। राहोः स्वर्भानोश्च दर्शनानि भवन्ति। अर्कचन्द्रयोरन्यतरस्य ग्रहणं भवतीत्यर्थः। एतेषां सप्ताहान्तरदर्शने उत्पाता निष्फला ज्ञेयाः। तदुदयकारणमिति। ब्रूयाद् वदेत्।

केतुतामसकीलकराहूणामित्यर्थः। एतदुक्तं भवति - अम्भः कलुषादिभिरुत्पातैर्दृष्टै-र्निश्चितं केत्वादीनामुदयो वक्तव्यः। अथ कदाचित्केतादीनां दर्शनं न भवति तदा अम्भः कलुषादीनामेव फलं वदेत्।

**यस्मिन् यस्मिन् देशे दर्शनमायान्ति सूर्यबिम्बस्थाः।**

**तस्मिंस्तस्मिन् व्यसनं महीपतीनां परिज्ञेयम्।। १२,१३,१४,१५।।**

**गर्भेष्वपि निष्पन्ना वारिमुचो न प्रभूतंवारिमुचः।**

**सरितो यान्ति तनुत्वं क्वचित् क्वचिज्जायते सस्यम्।। १६।।**

**यस्मिन् यस्मिन् देश इति**। ते तामसकीलकाः सूर्यबिम्बस्था आदित्यमण्डलगताः। यस्मिन् यस्मिन् यत्र तत्र देशे दर्शनमायान्त्युपगच्छति तस्मिन् तस्मिंस्तत्र तत्र देशे महीपतीनां भूमिपानां व्यसनं दुःखं परिज्ञेयं ज्ञातव्यम्।

**दण्डे नरेन्द्रमृत्युर्व्याधिभयं स्यात् कबन्धसंस्थाने।**

**ध्वाङ्क्षे च तस्करभयं दुर्भिक्षं कीकेऽर्कस्थे।।१७।।**

अर्कस्थे सूर्यमण्डलसंस्थिते। दण्डे दण्डाकारे चिह्ने। नरेन्द्रस्य राज्ञो मृत्युर्मरणं स्यात्। कबन्धश्छित्रशिराः पुरुषः। कबन्धसंस्थाने कबन्धाकारे चिह्नेऽर्कस्थे। व्याधिभयं रोगभयम्। स्याद् भवेत्। ध्वाङक्षः काकस्तस्मिन्नर्कस्थे तस्करभयं चौरकृतं भयं वदेत्। कीलके कीलकाकारेऽर्कस्थे दुर्भिक्षमसुभिक्षं भवेत्।

**राजोपकरणरूपैश्छत्रध्वजचामरादिभिर्विद्धः।**

**राजान्यत्वकृदर्कः स्फुलिङ्गधूमादिभिर्जनहा।।१८।।**

राजा नृपस्तस्योपकरणानि हस्त्यश्वादयस्तद्रूपैस्तदाकारैरर्कः सूर्यो यदि विद्धो भवति। तथा छत्रध्वजचामरादिभिः। छत्रमातपत्रम्। ध्वजं पताका। चामरं बालव्यजनम्। आदिग्रहणाद् भृङ्गारकुम्भाकारैर्यद्यर्को विद्धो भवति तदा राजाऽन्यत्वकृत्,राज्ञोऽन्यत्वं करोति, अन्यो राजा भवतीत्यर्थः। अथ स्फुलिङ्गरग्निकणैर्धूमेन। आदिग्रहणाज्ज्वालादिभिर्युक्तो भवति तदा जनहा, जनान् हन्ति घातयतीत्यर्थः।

**एको दुर्भिक्षकरो व्याद्याः स्युर्नरपतेर्विनाशाय।**

**सितरक्तपीतकृष्णैस्तैर्विद्धोर्कोऽनुवर्णघ्नः।।१९।।**

एको वेधोऽर्कस्थो दुर्भिक्षमसुभिक्षं करोति। द्वावार्द्या येषां ते द्वयाद्याः। द्वौ त्रयश्चत्वारो वा वेधा नरपते राज्ञो विनाशायभावाय स्युर्भवेयुः। अर्क आदित्यस्तैश्छिद्रैस्सितरक्तपीतकृष्णै-र्विद्धोऽनुवर्णघ्नो भवति। अनु क्रमेण। वर्णान् द्विजादीन् हन्ति। तद्यथा–सितैः श्वेतवर्णेश्वि-छ्रैर्विद्धो ब्राह्मणान् हन्ति घातयति, रक्तवर्णैः क्षत्रियान्, पीतवर्णैर्वैश्यान्, कृष्णवर्णैः शुद्रानिति।

**दृश्यन्ते च यतस्ते रविबिम्बस्योत्थिता महोत्पाताः।**

**आगच्छति लोकानां तेनैव भयं प्रदेशेन।। २०।।**

ते महोत्पाता ध्वाङ्क्षप्रभृतयो रविबिम्बस्यार्कमण्डलस्योत्थिता उत्पन्न यतो यस्यां दिशि दृश्यन्ते, पूर्व्यां दक्षिणस्यां पश्चिमायामुत्तरस्यां वा दिशि विदिक्षु वा तेनैव प्रदेशेन लोकानां जनानां, भयमागच्छति आयाति।

**ऊर्ध्वकरो दिवसकरस्ताम्र : सेनापतिं विनाशयति।**

**पीतो नरेन्द्रपुत्रं श्वेतस्तु पुरोहितं हन्ति।।२१ ,२२।।**

**शरदि कमलोदराभो हेमन्ते रुधिरसन्निभः शस्तः।**

**प्रावृट्काले स्निग्धः सर्वर्तुनिभोऽपि शुभदायी।।२३, २४।।**

शिशिरे ताम्रः कपिलो वा। वसन्ते कुङ्कुमाभो हरितो वा। ग्रीष्मे कनकवैदूर्यप्रभः। प्रावृषि सर्ववर्णः। शरदि पद्माभो हेमन्ते रक्तवर्णो रश्मिः सर्वर्तुषु श्वेतः पाण्डुवर्णश्च शस्यते विपरीतो विपरीतकारीति ।।

**रूक्षः श्वेतो विप्रान् रक्ताभः क्षत्रियान्विनाशयति।**

**पीतो वैश्यान् कृष्णस्ततोऽपरान् शुभकरः स्निग्घः।।२५।।**

**ग्रीष्मे रक्तोभयकृद्वर्षास्वसितः करोत्यनावृष्टिम्।**

**हेमन्ते पीतोऽर्कः करोत्यचिरेण रोगभयम्।। २६।।**

अर्क आदित्यो रक्तो लोहितवर्णो ग्रीष्मे दृष्टो भयकृद भयं करोति। वर्षासु ऋतु असितवर्णः कृष्णवर्णोऽनावृष्टिं वृष्ट्यभावं करोति। हेमन्ते पीतः पीतवर्णो न चिरेण शीघ्रमेव रोगभयं गदभीतिं करोति। शेषर्त्तुषु न विशेषः पूर्वोक्तमेव शुभाशुभमिति।

**सुरचापपाटिततनुर्नृपतिविरोधप्रदः सहस्त्रांशुं :।**

**प्रावृट्काले सद्यः करोति विमलद्युतिर्वृष्टिम्।।२७।।**

**वर्षाकाले वृष्टिं करोति सद्यः शिरीषपुष्पाभः।**

**शिखिपत्रनिभः सलिलं न करोति द्वादशाब्दानि।।२८।।**

वर्षाकाले प्रावृट्समये शिरीषपुष्पाभः शिरीषपुष्पकान्तिसदृशो नीलपीत इत्यर्थः। सद्यो वृष्टिं करोति। शिखी मयूरस्तस्य पत्रं पक्षस्त्रन्निभस्तत्तुल्यो मयूरचन्द्रिकाकारों द्वादशवर्षाणि सलिलं जलं न करोति न वर्षतीत्यर्थः। तथा च वृद्धगर्गः - **बृ.सं.,पृ-७७**

**श्यामेऽर्के कीटभयं भस्मनिभे भयमुशन्ति परचक्रात्।**

**यस्यर्क्षे सच्छिद्रस्तस्य विनाशः क्षितीशस्य।। २९।।**

**शशरुधिरनिभे भानौ नभस्तलस्थे भवन्ति सङ्ग्रामाः।**

**शशिसदृशे नृपतिवधः क्षिप्रं चान्यो नृपो भवति।।३०।।**

शशः प्राणिविशेषः। भानावादित्ये शशरुधिरनिभे शशलोहितवर्णे अतिरक्त इत्यर्थः। नभस्तलस्थे मध्याह्ने मध्यस्थिते सङ्ग्रामा युद्धानि भवन्ति। नभस्तलग्रहणमुदयास्त-मयकालपरिहारार्थम्। तत्र किल स्वभावादतिलोहितो रविर्भवति। तथा च गर्गः - **बृ.सं.,पृ-७८**

शशिसदृशे चन्द्रनिभे विरश्मौ शीतले च नृपते राज्ञो बधो मरणं भवति। क्षिप्रं चाश्वेवान्यो-ऽपरो नृपो राजा भवति।।

**क्षुन्मारकृद्धटनिभः खण्डो नृपहा विदीधितिर्भयदः।**

**तोरणरूपः पुरहा छत्रनिभो देशनाशाय।।३१।।**

घटनिभो घटाकारोऽर्कः। क्षुन्मारकृत्। क्षुद्दुर्भिक्षं मारं मरकं च करोति। खण्ड एकदेशाद्धीनो जनहा। जनान् हन्ति घातयति। विदीधितिर्विगतरशिमर्भयदो भीतिं ददाति।

तोरणरूपस्तोरणाकारः पुरहा। पुरं नगरं हन्ति। छत्रनिभ आतपत्राकारो देशस्य जनपदस्य नाशाय विघाताय भवति।।३१।।

**ध्वजचापनिभे युद्धानि भास्करे वेपने च रूक्षे च।**
**कृष्णा रेखा सवितरि यदि हन्ति नृपं ततःसचिवः।। ३२।।**

ध्वजः प्रसिद्धो बहुपटरचितः पताकारूपः। चापं धनुः। भास्करे सूर्ये। ध्वजचापनिभे तदाकृतौ। यद्धानि सङ्ग्रामा भवन्ति। वेपने कम्पमाने रूक्षे वाऽस्निग्धे युद्धान्येव भवन्ति। सवितर्यादित्ये कृष्णवर्णरेखा यदि मध्ये दृश्यते तदा नृपं राजानं सचिवो मन्त्री हन्ति घातयति। केचित्पठन्ति नृपं सचिवतम्। नृपं सचिवः च हन्ति। तथा च पराशरः - **बृ.सं.,पृ-७९**

**दिवसकरमुदयसंस्थितमुल्काशनिविद्युतो यदा हन्युः।**
**नरपतिमरणं विद्यात् तदान्यराजप्रतिष्ठां च।। ३३।।**

दिनकरमादित्यमुदयास्तसंस्थितमुदयरेखास्थमस्तस्थमपररेखास्थं वा यदा उल्का अशनिर्विद्युद्धा आसां लक्षणं वक्ष्यति। एता हन्युस्ताडयेयुस्तदा तस्मिन् काले नरपतेर्मरणं मृत्युम्। विन्द्याद्विजानीयात्। तथाऽन्यराजप्रतिष्ठा। अन्यस्य द्वितीयस्य राज्ञो नृपत्वे प्रतिष्ठा स्थितिस्तत्क्षणमेव भवति। तथा च पराशरः। **बृ.सं.,पृ-८०**

**प्रतिदिवसमहिमकिरणः परिवेषी सन्ध्ययोर्द्वयोरथवा।**
**रक्तोऽस्तमेति रक्तोदितश्व भूपं करोत्यन्यम्।।३४।।**

**प्रहरणसदृशैर्जलदैः स्थगितः सन्ध्याद्वयेऽपि रणकारी।**
**मृगमहिषविहगखरकरभसदृशरूपैश्व भयदायी।।३५।।**

**दिनकरकराभितापादृक्षमवाप्रोति सुमहर्ती पीडाम्।**
**भवति च पश्चाच्छुद्धं कनकमिव हुताशपरितापात्।।३६।।**

यस्मिन्नृक्षे नक्षत्रे दिनकरः सूर्यः स्थितस्तदृक्षं दिनकरकराभितापात्सूर्यरश्मिसन्तापात् सुमहतीं पीडामतिरुजमवाप्नोति लभते। तदेव सूर्यमक्षं पश्चादनन्तरं शुद्धं निर्दोषं भवति। यथा कनकं सुवर्णं हुताशपरितापादग्निसन्तापेन शुद्धं निर्मलं भवति। तथा च पराशरः- **बृ.सं.,पृ-८१**

**दिवसकृतः प्रतिसूर्यो जलकृदुदग्दक्षिणे स्थितोऽनिलकृत्।**
**अभयस्थः सलिलभयं नृपमुपार निहन्त्यो जनहा।।३७।।**

रुधिरनिभो वियत्यवनिपान्तकरो न चिरात्।

पुरुषरजोऽरुणीकृततनुर्यदि वा दिनकृत्॥ ३८॥

असितविचित्रनीलपरुषो जनधातकरः।

खगमृगभैरवखररुतैश्च निशाद्यमुखे॥३९॥

अमलवपुर्दिवाकर स्फुटविपुलामल दीर्धदीधितिः।

अविकृततनुवर्णचिह्नभृज्जगति करोति शिवं दिवाकरः॥ ४०॥

अमलवपुरिति। एवंविधो दिवाकरः सूर्यो जगति जनानां शिवं श्रेयः करोति कीदृशोऽमल-वपुर्निलशरीरः। अवक्रमण्डलः स्पष्टबिम्बः। तथा च पराशरः- **बृ.सं.,पृ-८२**

## २. चन्द्रचाराध्यायः -

**नित्यमधस्थस्येन्दोर्भाभिर्भानोः सितं भवत्यर्धम्।**

**स्वच्छाययान्यदसितं कुम्भस्थेवातपस्थस्य।।१ ।।**

इन्द्रोश्चन्द्रस्य भानोरादित्यादधः स्थस्य भानवीभिर्भाभिः सूर्यरश्मिभिर्नित्यं सर्वकाल-मेकमर्द्धदलं सितं शुक्लं भवति। यस्मिन् गोलकभागेऽर्करश्मयः पतन्ति तदेवार्द्धं शुक्लं भवति। अन्यद् द्वितीयमर्द्धं स्वच्छायया कृष्णं नित्यमेव भवति। कथम ? उच्यते कुम्भेस्येवाऽऽतपस्स्थस्य। कुम्भस्य यस्मिन्नर्द्धे रश्मयः पतन्ति तदर्द्धं शुक्लं दृश्यते। अन्यदर्द्धं स्वच्छायया कृष्णं दृश्यते। तथा च **ब्रह्मसिद्धान्ते** -

**सलिलमये शशिनि रवेर्दीधितयों मूर्च्छितास्तमो नैशम्।**

**क्षपयन्ति दर्पणोदरनिहता इव मन्दिरस्यान्तः।।२ ।।**

शशिनि चन्द्रसमि सलिलमयेऽम्बुमये रवेरादित्यस्य सम्बन्धिन्यो दीधितयो रश्मयो मूर्च्छितास्तत्रं संलग्नाः प्रतिफलिता नैशं निशाभवं रात्र्युत्पन्नं तमोऽन्धकारं क्षयपन्ति नाशयन्ति। तथा दर्पणोदरे आदर्शमध्ये द्वारप्रवेशे गृहस्य सूर्यरश्मयो निहिताः संरुद्धा मन्दिरस्य गृहस्यान्तर्मध्ये तमः क्षपयन्ति तथेति। तथा च सूर्यसिद्धान्ते –

अथ शशिनः पश्चिमदिभागात्सितवृद्धिः किमुपलभ्यते ? तदर्थमाह-

**त्यजतोऽर्कतलं शशिनः पश्चादवलम्बने यथा शौक्ल्यम्।**

**दिनकरवशात्तथेन्दोः प्रकाशतेऽधः प्रभृत्युदयः।।३ ।।**

शशिनंश्चन्द्रमसोऽर्कतलं सूर्याधोभागं त्यजतो यथा येन प्रकारेण पश्चात्यश्चिमायां दिशि शौक्ल्यं शुक्लत्वमवलम्बते आक्रमते। तथा तेनैव प्रकारेणेन्दोश्चन्द्रस्य दिनकरवशात्सूर्यहेतोरधः प्रभृति बुध्न-भागादारभ्योदयः प्रकाशते विराजते इति। एतदुक्तं भवति। रवेरधोभागस्थश्चन्द्रमां अमावास्यान्ते भवति तत्र च तस्य चन्द्रलोकस्य सूर्याभिमुखं गोलार्द्धं शुक्लं भवति। अधः स्थितमवनिदृशभागं कृष्णवर्णं भवति। ततः प्रतिपदादिषु तिथिषुं यथा यथा स्वभोगतुल्येनार्कात्प्राङमुखः शीघ्रगतित्वाद्याति तथातथा दृष्टिवर्तिनं सितमधोभागेऽवलम्बते। तथा च **सूर्यसिद्धांन्ते** -

विप्रकर्ष यथा याति ह्यधः स्थश्चन्द्रमा रवेः।

तथातथाऽस्य भूर्दश्यमंशं भासयते रवेः।।इति।।३ ।।

**प्रतिदिवसमेवमर्कात् स्थानविशेषेण शौक्ल्यपरिवृद्धिः।**

**भवति शशिनोऽपराह्ने पश्चाद्भागे घटस्येव।।४।।**

**ऐन्द्रस्य शीतकिरणो मूलाषाढाद्वयस्य वा यातः।**

**याम्येन बीजजलचरकाननहा वह्निभयदश्च।।५।।**

ऐन्द्रं ज्येष्ठा। मूलं नैर्ऋतम्। आषाढाद्वयं पूर्वाषाढोत्तराषाढे। शीतकिरणश्चन्द्रमा ऐन्द्रस्य मूलाषाढाद्वयस्य च याम्येन दक्षिणेन यदा यातो गतस्तदा बीजानि यान्युप्यन्ते। जलचरा जलप्राणिनः। काननानि वनानि च। हन्ति नाशयति। तथा वह्निभयदश्चाग्निभयदो भवति। अर्थादेवोत्तरेण गतः शोभनः। ततो वक्ष्यति -

**दक्षिणपार्श्वेन गतः शशी विशाखानुराधयोः पापः।**

**मध्येन तु प्रशस्तः पित्र्यस्य विशाखयोश्चापि।।६।।**

विशाखाऽनुराधे प्रसिद्धे नक्षत्रे। अनयो : शशी चन्द्रो दक्षिणापार्श्वेन याम्यभागेन गतो यातः। पापाः पापफलदोऽनिष्टदो भवति। अर्थादेवोत्तरेण शुभः। पितृदेवो मघा। विशाखा प्रसिद्धाः अनयोर्द्वयोर्मध्येनान्तरेण चन्द्रमा गतः प्रशस्तः। शुभफलदः। अपिशब्दो विशेषं द्योतयति, तेन मघाविशाखायोरुत्तरेणापि गतश्चन्दः शुभफलदः। तथा च समाससंहितायाम् – **बृ.सं.,पृ-८५**

तथा च पराशरः **बृ.सं.,पृ-८५**

अथ मार्गेष्वाग्नेयादुत्तरोऽतिवर्षकरो मैत्रसावित्राभ्यां प्रजाहितकारी। ज्येष्ठाग्नेयमैत्र-त्वाष्ट्राणां दक्षिणतश्चरन् पुष्कलाशुभदः। उपरिष्टाद्वैरोधिको धान्यविनाशी। अधो यवसम्पत्करः। मघाऽनुराधाभ्यां मध्येन गमनमतिशोभनम्। शिशिरग्रीष्मयोर्दक्षिणे च शुभदो वर्षास्ववर्षकरः सर्वर्तुषु नैर्ऋतेऽपि विश्वदेवानां चेति।।

**षडनागतानि पौष्णाद् द्वादश रौद्रञ्च मध्ययोगीनि।**

**ज्येष्ठाद्यानि नवर्क्षाण्युडुपतिनातीत्य युज्यन्ते।।७।।**

यान्यर्द्धभोगीनि तात्यतीत्य पुज्यन्ते। यान्यध्यर्द्धभोगीनि तान्येवानागतानि। यानि समभोगीनि तानि मध्यभोगानि युज्यघ्त्ह्य। तथा च गर्गः - **बृ.सं.,८६**

नन्वाचार्येणान्यथोक्तानि तान्यन्यथा स्थितानि। उच्यते – आचार्येणातिगोलज्ञतया यष्टि-यन्त्रेण देवदर्शनदृक्समान्युक्तानि। अथ किम्प्रमाणमध्यर्द्धभोगिनां किं वार्द्ध भोगिनां कि च

समभोगिनामिति। उच्यते चन्द्रमध्यमभुक्तिरध्यर्द्धगुणा अध्यर्द्धभोगिनां प्रमाणमर्द्धगुणां अर्द्धभोगिनामे कगुणा समभोगिनामिति। तथा च ब्रह्मसिद्धान्ते - **बृ.सं.,पृ-८६**

अथ चन्द्रमसः संस्थानानि दश भवन्ति। तद्यथा- नौर्लाङ्गलं दृष्टलाङ्गलं समो दण्डः कार्मुकं युगं पार्श्वशय्यावर्जितं कुण्डाख्यमिति। तत्र नौसंस्थानस्य लक्षणं फलं चाह-

**उन्नतमपिच्छृङ्गं नौसंस्थाने विशालता चोक्ता।**
**नाविकपीडा तस्मिन् भवति शिवं सर्वलोकस्य।।८।।**

**अर्द्धोन्नते च लांगलमिति पीडा तदुपजीविनां तस्मिन्।**
**प्रीतिश्च निर्निमित्तं मनुजपतीनां सुभिक्षं च।।९।।**

**दक्षिणविषाणमर्द्धोन्नतं यदा दुष्टलांगलाख्यं तत्।**
**पाण्ऽयनरेश्वरनिधनकृदुद्योगकरं बलानां च।।१०।।**

**समशशिनि सुभिक्षक्षेमवृष्टयः प्रथमदिवससद्दशाः स्युः।**
**दण्डवदुदिते पीडा गयां नृपश्चोग्रदण्डोऽत्र।।११।।**

**कार्मुकरूपे युद्धानि यत्र तु ज्यातो जयस्तेषाम्।**
**स्थानं युगमिति याम्योत्तरायतं भूमिकम्पाय।।१२।।**

कार्मुकं धनुस्तद्रूपे तदाकारे संस्थाने। युद्धानि संग्रामा भवन्ति। यत्र तु ज्या यस्मिन् भागे गुणस्तत्र तस्यां दिशि ये स्थिता राजानस्तेषां जयो भवति। तथा च वृद्धगर्गः-**बृ.सं,पृ-८८**

स्थानं युगमिति। तत्स्थानं याम्योत्तरायतं दक्षिणसौम्यभागविस्तीर्णां मध्यमं मण्डलं यदि भवति तद्युगं नाम। तच्च भूमिकम्पाय भवति। एतदुक्त भवति - एवंविधे संस्थाने तन्मासमध्ये भूमिकम्पो वक्तव्यः। तथा च वृद्धगर्ग- **बृ.सं.,पृ-८९**

**युगमेव याम्यकोटयां किञ्चित्तुंगं स पार्श्वशायीति।**
**विनिहन्ति सार्थवाहान् वृष्टेश्च विनिग्रहं कुर्यात्।।१३।।**

**अभ्युच्छ्रायादेकं यदि शशिनोऽवाङ्मुखं भवेच्छृंगम्।**
**आवर्जितमित्यसुभिक्षकारि तद्गोधनस्यापि।।१४।।**

अधोमुखं यदा श्रृङ्गं शशिनो दृश्यते तदा।
संस्थानमावर्जितकं गोघ्नं दुर्भिक्षकारकम्।।इति।।

**अव्युच्छिन्ना रेखा समन्ततो मण्डला च कुण्डाख्यम्।**

**अस्मिन्माण्डलिकानां स्थानत्यागो नरपतीनाम्।।१५।।**

एवमत्र तानि नोत्पद्यन्ते किमर्थमाचार्येण फलमुक्तम्। उच्यते – यानि नोत्पद्यन्ते परिलेखविधौ तान्युत्पातरूपाणि कदाचिद्दृश्यन्ते यतस्तेषां भगवद्गर्गादिविरचितशास्त्रेषु फलानि दृश्यन्ते , तानि चाऽऽचार्येण पूर्वशास्त्राऽऽचारेणोक्तानीति। पराशरतन्त्रेऽष्टौ संस्थानान्युक्तानि। तथा च पराशरः-

तत्राऽष्टौ संस्थानानि भवन्ति। तद्यथा- लाङ्गलं नौर्दूष्टलाङ्गलं दण्डो धनुर्युगं सममवाक्शिरः। तत्रैषामीषदुन्नतोत्तरश्रृङ्गं लाङ्गलसंस्थानं तत्र सुभिक्षेक्षेमवृष्टिकारणा-न्युत्पद्यन्ते। उभयश्रृङ्गः कुक्षिमान्वि-शालो नौस्थायी फलतः समः। पूर्वेण दक्षिणोन्नतश्रृङ्गो दृष्टलाङ्गलं परसैन्योद्योगनाशकृत्। दण्डवद्दण्ड-स्थायी दण्डकृत्प्रजानाम्। ध नुष्यख्यो धनुः स्थायी स धनुर्द्धराद्योगकृतोऽस्य ज्या, ततो विजयः। यद्युदगायता दक्षिणेन चास्य लेखा भवति, तद्युगसंस्थानमिच्छन्ति जगद्विद्रवभूकम्पाय। समोभयश्रृङ्गः समस्तसंस्थानं महाभयकृत्। शस्त्रसारभयदोऽवाक्शिराः। अथैतानि शुक्लप्रतिपदि द्वितीयायां वा लक्ष्याणि भवन्ति। तथा च **समाससंहितायाम्** - बृ.सं.,पृ-९१

**प्रोक्तस्थानाभावादुदगुच्चः सस्यवृद्धिवृष्टिकरः।**

**दक्षिणतुंगश्चन्द्रो दुर्भिक्षभयाय निर्दिष्टः।।१६।।**

प्रोक्तानि कथितानि यानि संस्थानानि तेषामभावादसळम्भवाद्यद्युदगुच्च उत्तरोन्नतश्चन्द्रमास्तदा क्षेमवृद्धिवृष्टिकरः। लब्धपालनं क्षेमस्तं च करोति। वृद्धयः सस्यवृद्धयो वृष्टिर्वर्षणं ते च करोतीति।

अथ दक्षिणतुङ्गो याम्योन्नतो भवति दक्षिणविषाणोन्नतस्तदा दुर्भिक्षभयास निर्दिष्टः कथितः। दुर्भिक्षभयं च करोति।।

**श्रृंगेणैकेनेन्दुं विलीनमथवाप्यवाङ्मुखमश्रृंगम्।**

**सम्पूर्णं चाभिनवं दृष्टैको जीविताद् भ्रश्यते्।।१७।।**

एवंविधमिन्दुं चन्द्रं दृष्ट्वा विलोक्यैको मनुजो जीवितादायुषो भ्रश्येत् पतेत्। य एवैकः पश्यति स म्रियत इत्यर्थः कीदृशम् ? एकेन श्रृङ्गेणोपलक्षितम्। अथवा विलीनं गलितमिवैकेन श्रृङ्गेण। अपिशब्दो विकल्पनार्थः। अथवाऽवाङ्मुखमधोमुखं श्रृङ्गं चास्य भवति। तथा सम्पूर्णं

परिपूर्णमभि-नवमभि मुख्येन नवम्। चशब्दः समुच्यते। अथवाऽभि मुख्येन नवं द्वितीयाचन्द्रमेवंविधं यश्यति। तथा च समाससंहितायाम्- **बृ.सं.,पृ-९३**

**संस्थानविधिः कथितो रूपाण्यस्माद्भवन्ति चन्द्रमसः।**

**स्वल्पो दुर्भिक्षकरो महान् सुभिक्षावहः प्रोक्तः।।१८।।**

**मध्यतनुर्वजाख्यः क्षुद्भयदः संभ्रमाय राज्ञां च।**

**चन्द्रो मृदंगरूपः क्षेमसुभिक्षावहो भवति।।१९।।**

**ज्ञेयो विशालमूर्तिर्नरपतिलक्ष्मीविवृद्धये चन्द्रः।**

**स्थूलः सुभिक्षकारी प्रियधान्यकरस्तु तनुमूर्त्तिः।।२०।।**

**प्रत्यन्तान् कुनृपांश्व हन्त्युडुपतिश्रृंगे कुजेनाहते**

**शस्त्रक्षुद्भयकृद्यमेन शशिजेनावृष्टिदुर्भिक्षकृत्।**

**श्रेष्ठान् हन्ति नृपान्महेन्द्रगुरुणा शुक्रेण चाल्पान्नृपान्**

**शुल्के याप्यमिदं फलंग्रहकृतं कृष्णे यथोक्तागमम्।।२१।।**

**शुक्ले याप्यमिति।** इदं ग्रहकृतं श्रृङ्गभङ्गफलं शुक्लपक्षे याप्यं भवति किञ्चिद्भवतीत्यर्थः। कृष्णे कृष्णपक्षे यथोक्तागमं यथा निर्दिष्टं सकलं फलं भवतीति। तथा च पराशरः- **बृ.सं.,पृ-९४**

अथ श्रृङ्गाभिमर्दने गुरुः प्रधाननृपविनाशाय। भृगुर्यायिनां कुनृपाणाम्। भौमः सौम्यो दुर्भिक्षायावृष्टये। क्षुच्छस्त्रभयदः सौर इति। तथा च समाससंहितायाम् – **बृ.सं.,पृ-९४**

अधुना शुक्रभिन्नबिम्बस्य चन्द्रमसः फलमाह-

**भिन्नः सितेन मगधान्यवानान् पुलिनदान्**

**नेपालभृंगिमरुकच्छसुराष्ट्रमद्रान्।**

**पाञ्चालकैकयकुलूतक-पूरूषादान**

**हन्यादुशीनरजनानपि सप्त मासान्।।२२।।**

सितेन शुक्रेण यदा भिन्नश्चन्द्रो मध्याद्विदारितस्तदा मगधान् जनान् यवनान् पुलिन्दान, एतान् सर्वान् जनान्। नेपालभृङ्गिमरुकच्छसुराष्ट्रमद्रानेतान् जनान्, पाञ्चालान्, कैकयान्, कुलूतकान् जनानेव। पुरुषादान् पुरुषभक्षान्। उशीनरजनान् ,एतान् सर्वान् पाककालादनन्तरं सप्त मासान् यावन्निहन्याद् घातयेत्।।

गान्धारसौवीरकसिन्धुकीरान् धान्यानि शैलान्द्रविडाधिपांश्वा।

द्विजांश्च मासान् दशशीतरश्मिः सन्तापयेद्ना- क्पतिनाविभिन्नः।। २३।।

उद्युक्तान् सह वाहनैर्नरपतींस्त्रैगर्तकान्मालवान्

कौलिन्दान् गणपुंगवानथ शिबीनायोध्यकान् पार्थिवान्।

हन्यात् कौरवमत्स्यशुक्त्यधिपतीन् राजन्यमुख्यानपि

प्रालेयांशुरसृग्ग्रहे तनुगते षण्मासमयार्दया।।२४।।

यौधेयान् सचिवान् सकौरवान् प्रागीशानथ चार्जुनायनान्।

हन्यादर्कजभिन्नमण्डलः शीतांशुर्दश-मासपडिया।।२५।।

मगधान्मथुरां च पीडियेद् वेणायाश्च तटं शशाङ्कजः।

अपरत्र कृतं युगं वदेद् यदि भित्वा शशिनं विनिर्गतः।।२६।।

शशाङ्कजो बुधो यदि शशिनं चन्द्रं भित्त्वा विदार्य विनिर्गतो विनिः सृतस्तदा मगधान् देशान् मथुरां च पीडयेत् हन्ति। तद्वासिनो जनान् विनाशयति। वेणा नाम नदी तस्यास्तटं तत्तीरे ये निवासिनस्तान् जनानित्यर्थः। एतानुक्तान् वर्जयित्वाऽपरत्र अन्यदेशेषु कृतं युगं वदेत् कृतयुगाकारं ब्रूयात् तद्धर्मानुवृते।।

क्षेमारोग्यसुभिक्षविनाशी शीतांशु : शिखिना यदि भिन्नः।

कुर्यादायुधजीविविनाशं चौराणामधिकेन च पीडाम्।।२७।।

उल्कया यदा शशी ग्रस्त एव हन्यते हन्यते।

तदा नृपो यस्य जन्मनि स्थितः।।२८।।

शशी चन्द्रः। ग्रस्तो राहुराशिगतो यदोल्कया हन्यते , तदभिमुखी उल्का यात, तदा यस्य नृपस्य यस्य राज्ञः, जन्मनि जन्मगतः स्थितः स हन्यते तदा म्रियत इत्यर्थः। तथा च समाससंहितायाम्।

उल्काभिहतो ग्रहणे तन्नक्षत्रं नृपं हन्ति।।इति।।

भस्मनिभः पुरुषोऽरुणमूर्त्तिः शीतकरः किरणैः परिहीणः।

श्यावतनुः स्फुटितः स्फुरणो वा क्षुत्समरामयचौरभयाय।।२९।।

प्रालेयकुन्दकुमुदस्फटिकावदातो यत्नादिवाद्रिसुतया परिमृज्य चन्द्रः।
उच्चैः कृतो निशि भविष्यति मे शिवाय यो दृश्यते स भविता जगतः शिवाय।।३०।।

भस्मारुणविह्निताम्रपीतपाण्डुनीलरूक्षवर्णः क्षुद्वैरकरः। स्निग्धः प्रसन्नो रश्मिवान् श्वेतः क्षेमसुभिक्ष-वृष्टिकरः इति।

शुक्ले पक्षे सम्प्रवृद्धे प्रवृद्धिं ब्रह्मक्षतं याति वृद्धिं प्रजाश्च।
हीने हानिस्तुल्यता तुल्यतायां कृष्णे सर्वं तत्फलं व्यत्ययेन।।३१।।

यदि कुमुदमृणालहारगौरस्थितिनियमात् क्षयमेति वर्द्धते वा।
अविकृतगतिमण्डलांशुयोगी भवति नृणां विजयाय शीतरश्मिः।।३३।।

# ३. राहुचाराध्यायः

तत्रादावेव राहोर्ग्रहत्वप्रतिपादनाय मतान्तरमाह-

**अमृतास्वादविशेषाच्छिन्नमपि शिरः किलासुरस्येदम्।**

**प्राणैरपरित्यक्तं ग्रहतां यातं वदन्त्येके।।१।।**

किलशब्द आगमप्रदर्शनार्थः। एके केचिदाचार्या एवं वदन्ति कथयन्ति। लोके यो राहुरित्युच्यते स चाऽसुरः सैंहिकेयः। तस्य पुराऽमृतं पिबतो भगवता हरिणा सुदर्शनाख्येन चक्रेण शिोर मूर्द्धा छिन्नं निकृत्तमपि अमृताऽऽस्वादविशेषादमृताऽऽस्वादनहेतोः प्राणैरसुभिरपरित्यकं नोज्झितं ग्रहतां यातं तदेव ग्रहत्वं प्राप्तमिति।। तथा च पुराणकारः-

पद्येवंविधो राहुस्तत्किमित्याकाशे ग्रहवन्नोपलभ्यते तदर्थमाह-

**इन्द्वर्कमण्डलाकृतिरसितत्वात् किल न दृश्यते गगने।**

**अन्यत्र पर्वकालाद् वरप्रदानातं कमलयोनेः।।२।।**

इन्दुमण्डलस्य चन्द्रबिम्बस्यार्कमण्डलस्य सूर्यबिम्बस्य च यादृशाकृतिराकास्तादृगेव राहुमण्डलस्य। यद्येवं तत् किमिति गगने आकाशे न दृश्यते नोपलभ्यते ? असितत्वात् किलेति, असितत्वात् कृष्णत्वात् किल न दृश्यते यतोऽसौ तमोमय इति। यदि न दृश्यते तदास्य दर्शनमस्तीत्याह- अन्यत्र पर्वकालादिति। कमलयोनेर्ब्रह्मणो वरप्रदानात् पर्वकालाद् ग्रहणसमयदान्यत्र अन्यस्मिन् काले न दृश्यते, पर्वकाले तु पुनर्दृश्यते। तथा च पराशरः **बृ.सं.,पृ-९९**

पुरा पुरुहूतपितरं कश्यपमपत्यार्थमकाले सिंहिका अभियाचयामास। तस्यै मुनिरकालाय-ञ्चाकोपाद्दरुणं मयकालान्तकोपमं सुतमदात्, तं राहुमित्याचक्षते कुशलाः। स जातमात्र एवाऽदिति-सुतङ्गरावमर्दादनुं विमुखीकृतः क्रोधाद्धिमवति दिव्यमत्युग्रमयुतं वर्षाणां तपोऽतप्यत। स पितामहाद्दिवि चरणममरतां सुरविजयमर्कचन्द्रसम्भक्षणं च वरमभिवरयामास। तस्मै भगवानमरगुरुः स्वयम्भूः प्रहसन्नुवाच। अतिवरमशक्तस्त्वमेतौ जरयितुं किन्त्वेवमस्त्वियुक्त्वान्तर्हिते भगवति दिनकररजनि-करावभिदुद्राव राहुः। ततो हरिररिविमथनं चक्रमुपरि प्रक्षिप्यास्य शिरच्छित्वोवाच। सर्वमवितथं पितामहवचो भवतु स्वे स्वे युगे पर्वणि ग्रहणं कुर्वन् जगतः शुभाशुभानां कर्ता भविष्यसीति। तथा च भगवान् गर्गः- **बृ.सं.,पृ-१००**

अन्यदपि मतान्तरमाह-

**मुखपुच्छविभक्ताङ्गं भुजङ्गमाकामुपदिशन्त्यन्ये।**

**कथमन्त्यमूर्तमपरे तमोमयं सैंहिकेयाख्यम्।।३।।**

अधुनैतत्परमतं दूषयितुमाह-

**यदि मूर्तो भविचारी शिरोऽथवा भवति मण्डली राहुः।**

**भगणार्धेनान्तरितो गृह्णाति कथं नियतचारः।।४।।**

**अनियतचारः खलु चेदुपलब्धिः सङ्ख्यया कथं तस्य।**

**पुच्छाननाभिधानोऽन्तरेण कस्मान्न गृह्णाति।।५।।**

**अथ भुजगेन्द्ररूपः पुच्छेन मुखेन वा स गृह्णाति।**

**मुखपुच्छान्तरसंस्थं स्थगयति कस्मान्न भगणार्धम्।।६।।**

**राहुद्वयं यदि स्याद् ग्रस्तेऽस्तमितिऽथवोदिते चन्द्रे।**

**तत्समगतिनान्येन ग्रस्तः सूर्योऽपि दृश्यते।।७।।**

एवं मतान्तराणि निराकृत्य स्वसिद्धान्तमाह-

**भूच्छायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः।**

**प्रग्रहणमतः पश्चान्नेन्दोर्भानोश्च पूर्वार्धात्।।८।।**

अथ रात्रौ कुतो भूच्छाया भवत्येतत्प्रतिपादयितुमाह-

**वृक्षस्य स्वच्छाया यथैकयार्श्वेन भवति दीर्घा च।**

**निशि निशि तद्वद्भमेरावरणवशाद्दिनेशस्य।।९।।**

यद्येवं तत्प्रतिमासं किमिति चन्द्रस्य ग्रहणं न भवतीत्येतत्प्रतिपादयन्नाह-

**सूर्यात् सप्तमराशौ यदि चोदग्दक्षिणेन नानि गतः।**

**चन्द्रः पूर्वाभिमुखश्छायामौर्वीं तदाविशति।।१०।।**

अथ चन्द्रग्रहणं सर्वत्रैकरूपं दृश्यते अर्कग्रहणं प्रतिदेशमन्यादृशमित्येतत्प्रतिपादयन्ना-

**चन्द्रोऽधःस्थः स्थगयति रविमम्बुदवत्समागतः पश्चात्।**

**प्रतिदेशमतश्चित्रं दृष्टिवशाद्भास्करग्रहणम्।।११।।**

**आवरणं महदिन्दोः कुण्ठविषाणस्ततोऽर्धसञ्छन्नः।**

**स्वल्पं रवेर्यतोऽतस्तीक्ष्णविषाणो रविर्भवति।।१२।।**

इन्द्रोश्चन्द्रस्य महत् अतिबृहत् किञ्चिदावरणमाच्छादकः। ततस्तस्माद्धेतोरर्द्धसञ्छन्नो-ऽर्द्धग्रस्तः कुण्ठविषाणो भग्नश्रृङ्गो भवति।

रवेरादित्यस्य स्वल्पमावरणम्। यतो यस्मादर्द्धसञ्छन्नो रविस्तीक्ष्णविषाणस्तीक्ष्णश्रृङ्गो भवति। एतच्च भूच्छायाचन्द्रयोरेव सम्भ्वति। परिलेखकरणेनात्रोपपत्तिरिति। तथा चाऽऽचार्य एव पञ्चसिद्धान्ति-कायाम् —

राहुकृतमर्कचन्द्रयोर्न ग्रहणमित्येितत्प्रतिपादयितुमाह-

**एवमुपरागकारणमुक्तमिदं दिव्यदृग्भिराचार्यैः।**

**राहुः कारणमस्मिन्नित्युक्तः शास्त्रसद्भावः।।१३।।**

एवमनेन प्रकारेणेदमुपरागकारणं ग्रहणनिमित्तं दिव्यदृग्भिराचार्यैरुक्तं दिव्यज्ञानसंयुक्ता दृष्टिर्येषां ते दिव्यदृशस्तैर्दिव्यदृग्भिरुक्तं कथितम्। अस्मिन्नुपरागे राहुरकारणमनिमित्तमिति शास्त्रसद्भावः परमार्थं उक्त कथितः। इतिशब्दो निश्चयार्थे। तथा च ब्रह्मसिद्धान्ते —

ननु पद्येवमर्केन्द्वोर्न राहुकृतं ग्रहणं तत्छुतिसंहितालोकैः सह विरुध्यते। यतो लोके राहुकृतं ग्रहणमितयागोपालाङ्गनादिप्रसिद्धं स्मृतिषूक्तम्-

एवं मत्वा लोकश्रुतिस्मृतिसंहितानां यथैक्यं भवति तप्रतिपादनाय राहोरेव ग्राहकत्वमाह-

**तस्मिन् काले सान्निध्यमस्य तेनोपचर्यते राहुः।**

**याम्योत्तरा शशिगतिर्गणितेऽप्युपचर्यते तेन।।१५।।**

तस्मिन् काले ग्रहणसमयेऽस्य राहोः सान्निध्यं सन्निहितत्वं कमलजवरप्रदानाद्भवति तेन कारणेन लोके राहुरित्युपचर्यते कथ्यते। तेन भूच्छायाचन्द्रगोलौ द्वे स्थाने तस्य निवासार्थं परिकल्पिते। तत्र स्थितत्वात् स एवाऽऽच्छादक इति सर्वत्र प्रसिद्धिः। गणिते तु पुनः शशिगतिर्याम्योत्तरा दक्षिण-सौम्यविक्षेपवशात्। स च दक्षिणसौम्यविक्षेप उत्पद्यते पातवशात्। यतश्चन्द्रपात एव लोके राहुरिति प्रसिद्धः। भौमादीनां ताराग्रहाणामपि पाता विद्यन्ते। तेषामपि तद्वशात्तद्विक्षेपो भवति। तेन याम्योत्तरा गतिर्ज्ञायते। किमयं ग्रहः क्रान्त्यग्रादुत्तरेण विक्षिप्तः किं वा दक्षिणेनेति। एवं चन्द्रस्य याऽसौ दक्षिणोत्तरा गतिः पातवशात् सिध्यति, सैवापि लोके राह्वर्थेनोपचर्यते व्यवस्थाप्यते। अपिशब्दो निश्चयार्थे। एतदुक्तं भवतिचन्द्रविक्षेपज्ञानार्थं

यश्चन्द्रपातः परिकल्पितः स एव लोके राहुरित्युच्यते। तथा च ब्रह्मसिद्धान्ते-चन्द्रविक्षेपज्ञानार्थं पश्चन्द्रपातः परिकल्पितः स एव लोके राहुरित्युच्यते। तथा च ब्रह्मसिद्धान्ते- **बृ.सं.,पृ-१०५**

गर्गादिभिरुत्पातैर्ग्रहणज्ञाननिमित्तान्युक्तानि, तैर्ग्रहणज्ञानं स्फुटं न भवतीत्येतत्प्रतिपादयितुमाहि-

**न कथञ्चिदपि निमित्तैर्ग्रहणं विज्ञायते निमित्तानि।**

**अन्यस्मिन्नपि काले भवन्त्यथोत्पातरूपाणि।।१६।।**

अथान्यद् दूषणमाह-

**पञ्चग्रहसंयोगान्न किल ग्रहणस्य सम्भवो भवति।**

**तैलञ्च जलेऽष्टम्यां न विचिन्त्यमिदं विपश्चिद्भिः।।१७।।**

किलेत्यागमसूचने शास्त्रान्तरेष्वेवमुक्तम्। यथा पञ्चानां ग्रहाणां संयोगात् समागमाद् ग्रहणस्य सम्भवो न भवति। एतदुक्तं भवति। पौर्णमास्याममावास्यायां वा पञ्चग्रहसंयोगो यदि भवति तदा ग्रहणाभाव इति। तथा च वृद्धगर्गः - **बृ.सं.,पृ-१०६**

एतदसत्। अत्रापि दिक्परिज्ञानार्थमाह- तैलं च जलेऽष्टम्यामिति सोमग्रहणं सूर्यग्रहणं वा यदा भावि तदाष्टम्यां समीपवर्तिन्या तिथौ जलमध्ये तैलं क्षिप्तं यस्यां दिशि तत्प्रसरति तस्यामेव दिशि ग्रहणं वक्तव्यम्। पुनरपि मोक्षार्थं भूयो जलमध्ये तैलं क्षिप्तं यस्यामेव दिशि न प्रसरति तस्यामेव मोक्षो वक्तव्यः। तथा च वृद्धगर्गः- **बृ.सं.,पृ-१०७**

एतदप्यसत्। यतोऽस्मिन् भाण्डगते जले तैलं क्षिप्तं किमन्यस्यां दिशि न प्रसरति। अन्यत्र सर्वत्र प्रसरित तस्मात् सर्वमेव तदसत्। तथा च गर्गः- **बृ.सं.,पृ-१०७**
तस्माद्विपश्चिद्भिः पण्डितैरिदं न विचिन्त्यं नाङ्गीकार्यं पञ्चग्रहसंयोगातैलं च जलेऽष्टम्यामिति।।

अथ ग्रहणे ग्रासप्रमाणं दिग्ज्ञानं वेलाज्ञानं चाह-

**अवनत्यार्केग्रासो दिग् ज्ञेया वलनयावनत्या च।**

**तिथ्यवसानाद्वेला करणे कथितानि तानि मया।।१८।।**

इदानी कल्पादेः षण्मासोत्तरया वृद्धया सप्त पर्वाणि ब्रह्मादीनां भवन्ति। तेषां देवानां नामानि चाह-

**षण्मासोत्तरवृद्धया पर्वेशाः सप्त देवताः क्रमशः।**

**ब्रह्मशशीन्द्रकुबेरा वरुणाग्नियमाश्च विज्ञेयाः।।१९।।**

अथ तेषां फलान्याह-

**ब्राह्मे द्विजपशुवृद्धिक्षेमारोगाणि सस्यसम्पच्च।**

**तद्वत्सौम्ये तस्मिन् पीडा विदुषामवृष्टिश्च।।२०।।**

**ऐन्द्रे भूपविरोधः शारदसस्यक्षयो न च क्षेमम्।**

**कौबेरेऽर्थपतीनामर्थविनाशः सुभिक्षं च।।२१।।**

**वारुणमवनीशाशुभमन्येषां क्षेमसस्यवृद्धिकरम्।**

**आग्रेयं मित्राख्यं सस्यारोग्याभयाम्बुकरम्।।२२।।**

**याम्यं करोत्यवृष्टिं दुर्भिक्षं संक्षयं च सस्यानाम्।**

**यदतः परं तदशुभं क्षुन्मारावृष्टिदं पर्व।।२३।।**

षण्मासोत्तरवृद्धया पर्वेशा उक्ताः। तत्र कदाचिदुत्पातवशात्। पञ्चभिर्मासैः सार्द्धैः पञ्चभिर्वा षड्भिः सार्द्धैः, सप्तभिर्वा पर्व भवति। तत्पर्व ब्राह्मादि न भवति। तच्च क्षुन्मारा वृष्टिदम्, क्षुद, दुर्भिक्षम्, मारं मरणम् अवृष्टिमवर्षणं च ददाति। तथा च पराशरः-

शुक्लकृष्णाष्टमीपञ्चदश्योरन्तराद् ग्रहणनिमित्तानीन्दुभान्वोः प्रबलानि भवन्ति। तानि च निशामय। षण्मासात् चन्द्रमस्ततोऽर्द्धषष्ठेत्यादि चादित्यस्यापि पूजितमाहुराचार्याः। सप्तदशत्रयोदशपञ्चत्रिं-शन्मासिकानि चेन्दोस्त्रीणि विसन्धिग्रहणानि क्षुद्व्याधिमरक-दुर्भिक्षोपद्रवाय वेदितव्यानि। एवमेवैतानि प्राकृतवैकृतग्रहणानि। अतः परं सप्तविधेः पर्वेशान् कथयिष्यामः। ब्राह्मसौम्यैन्द्रकौबेरवारुणाऽऽग्नेययाम्यानि षण्मासान्तरितानि सप्त भवन्ति। तत्र ब्राह्म सस्यजननं तद्वत्सौम्यम्। ऐन्द्रं भूपालविरोधाक्षेमदुर्भिक्षकरम्। कौबेरमीश्वराणा-मैश्वर्यविनाशकरं क्षेमसस्यकृच्च। वारुणं वृष्टिसस्यक्षेमा-रोग्यकरम्। आग्नेयमन्नक्षयदम्। दुर्भिक्षायाल्पवृष्टये याम्यं चेति। तथा च गर्गः- **बृ.सं.,पृ-१११**

अथ वेलाहीनेऽतिवेले च पर्वणि फलमाह-

**वेलाहीने पर्वणि गर्भविपत्तिश्व शस्त्रकोपश्च।**

**अतिवेले कुसुमफलक्षयो भयं सस्यनाशश्य।।२४।।**

गणिताऽऽगतप्रग्रहणात् पूर्व यदि दृक्प्रग्रहणं दृश्यते तदा तत्पर्वं वेलाहीनम्। अथ गणिताऽऽगतप्रग्रहणकालात् पश्चाद् दृक्प्रग्रहणं भवति तदा तत्पर्वाऽतिवेलम्। वेलाहीने पर्वणि गर्भाणां विपत्तिर्नाशो भवति। गर्भागर्भलक्षणमग्रतो वक्ष्यति। ते तत्र विज्ञेयाः। तथा शस्त्रकोपो युद्धं च भवति।

अतिवेले पर्वणि कुसुमानां पुष्पाणां फलानां च क्षयो विनाशः। लोके भयं सस्याना नाशश्च भवति। तथा च गर्गः- **बृ.सं.,पृ-११२**

एतन्मया पूर्वशास्त्राणि निरीक्ष्योंक्तं न स्वमतेनेत्याह-

**हीनातिरिक्तकाले फलमुक्तं पूर्वशास्त्रदृष्टत्वात्।**

**स्फुटगणितविदः कालः कथञ्चिदपि नान्यथा भवति।।२५।।**

**पद्येकस्मिन् मासे ग्रहणं रविसोमयोस्तदा क्षितिपाः।**

**स्वबलक्षोभैः संक्षयमायान्त्यति-शस्त्रकापेश्च।।२६।।**

एकस्मिन् मासे रविसोमयोः सूर्य्याचन्द्रमसोर्यदि ग्रहणमुपरागो भवति, तदा क्षितिपा राजानः स्वबलक्षोभैरात्मीयसैन्यानां क्षोभणैः संक्षयं विनाशमायान्ति प्राप्नुवन्ति। अतिशस्त्रकोपोद्योगः संग्रामश्च भवन्ति। तथा च काश्यपः – **बृ.सं.,पृ-११३**

इत्यनेनैव सह पुनरुक्ततादोषः स्यात् यस्माज्ज्योतिः शास्त्रे मासः शुक्लादिरुक्तः। प्रथमपक्षान्ते सोमग्रहो द्वितीयपक्षान्तेऽमावास्यायामर्कग्रहात् तथैकमासः सञ्जायते तस्मादयं महान् दोषः।

यद्येकस्मिन् मासे ग्रहणं रविसोमयोरित्यस्यामायामौत्पातिकं पर्व विना रविसोमयोरप्येकस्मिन्नेव मासे ग्रहणफलमुक्तम। कुत एतल्लभ्यते। तथा च भगवान् व्यासः- **बृ.सं.,पृ-११३**

सोमग्रहे निवृत्ते पक्षान्ते यदि भवेद् ग्रहोऽर्कस्येत्यत्र पक्षान्ते मासान्ते पर्वनियममाहतस्मात् पुनरुक्ततादोषोऽन्यत्रावगम्यत इति।

**ग्रस्तावुदितास्तमितौ शारदधान्यावनीश्विरक्षयदौ।**

**सर्वग्रस्तौ दुर्भिक्षमरकदौ पापसंदृष्टौ।।२७।।**

**अर्धोदितोपरोक्तो नैकृतिकान् हन्ति सर्वयज्ञांश्व।**

**अग्न्युपजीविगुणाधिकविप्राश्रमिणोऽयुगाभ्युदितः।।२८,२९,३०।।**

**स्त्रीशूद्रान् षष्ठेंऽशे दस्युप्रत्यन्तहास्तमयकाले।**

**यस्मिन् खांशे मोक्षस्तत्प्रोक्तनां शिवं भवति।।३१।।**

कारुकाः शिल्पिनः। शूद्राः शूद्रजातयः। म्लेच्छा म्लेच्छजातयः। एतान् समन्त्रिजनान् मन्त्रिजनैः सह तृतीयेंऽशे तृतीय आकाशविभागे निहन्ति।

तथा मध्याह्ने चतुर्थे खांशे नरपतिमध्यदेशहा नरपतिं राजानं मध्यदेशं च निहान्ति मध्यदेशे यो राजा तमेव हन्ति। धान्यस्यार्धः शोभनो भवति सममर्घं धान्यं भवतीत्यर्थः। तृणभुजश्चतुष्पदान्। अमात्यान् मन्त्रिणः। अन्तः पुराणि राजदारान्। वैश्यान् वैश्यजातीयांश्च पञ्चमें खांशे आकाशभागे निहन्ति।

स्त्रीशूद्रानिति। स्त्रियो योषितः। शूद्राः शूद्रजातयः। एतान् षष्ठेंऽशे आकाशभागे निहन्ति। दस्यवश्चौरोः। प्रत्यन्ना गह्वरवसिनः। एतानस्तमयकाले निहन्ति। यस्मिन् खांशे आकाशभागे मोक्षो भवति तत्प्रोक्तानामग्न्युपजीविप्रभृतीनां शिवं श्रेयो भवति। अथ यस्मिन्नंशे प्रग्रहस्तस्मिन् मोक्षस्तदा यदुक्तं फलं तन्न भवति शुभाशुभं समं स्यात्। तथा काश्यपः- **बृ.सं.,पृ-११६**

अथायनफलं दिक्फलं चाह श्लोकत्रयेण-

**पूर्वेण सलिलपूर्णः करोति वसुधां समागतो दैत्यः।**

**पश्चात्कर्षकसेवकबीजविनाशाय निर्दिष्टः।।३२,३३३४।**

मकरादिराशिषट्कस्थेऽर्के उत्तरमयनम्। कर्कटादिराशिषट्कस्थेऽर्के दक्षिणमयनमिति। उदगयने उत्तरायणे राहुर्दुष्टो द्विजान् ब्राह्मणान् नृपतीन् क्षत्रियांश्च निहन्ति। तथा विट्शूद्रान् वैश्यान् शूद्रांश्च दक्षिणायने हन्ति घातयति। तथा च गर्गः- **बृ.सं.,पृ-११७**

राहुरुदगादिदृष्ट इति। उदगादिषूत्तराद्यासु चतसृषु दिक्षु प्रदक्षिणेन राहुर्दृष्टो विप्रादीन ब्राह्मणादीन हन्ति। एतदुक्तं भवति- सूर्ये चन्द्रे वा यद्युत्तरस्यां दिशि राहुः प्रग्रहणं करोति तदा ब्राह्मणान् हन्ति। पूर्वस्यां दृष्टः क्षत्रियान् निहन्ति। दक्षिणस्यां दृष्टो वैश्यान् हन्ति। पश्चिमायां दृष्टः शुद्रान्निहन्ति। अत्र यद्यप्यर्कचन्द्रयोर्दक्षिणोत्तरदिग्भागात् प्रग्रहणं न सम्भवति, तथाप्याचार्येण पूर्वशास्त्रदृष्टत्वात् कृतम्। तथा च काश्यपः- **बृ.सं.,पृ-११७**

अथ पूर्वपश्चिमयोर्दिशो : पुनरपि विशेषफलमाह- पूर्वेणेति। दैत्यो राहुः पूर्वेण पूर्वस्यां दिशि समागतो दृष्टो वसुधां भूमिं सलिलपूर्णां तोयपूर्णां करोति। पश्चादागतः कर्षकाणां कृषिकारणां सेवकानां पराऽऽराधनरतानां बीजानां च विनाशाय निर्दिष्ट उक्तः। उप्यन्ते यानि तानि बीजानि। तथा च काश्यपः- **बृ.सं.,पृ-११७**

अथ चन्द्रार्कयोर्मेषादिषु राशिषु ग्रस्तयोः फलान्याह-

**पञ्चालकलिङ्गशूरसेनाः काम्बोलोड्रकिरातशस्त्रवार्ताः।**

**जीवन्ति च ये हुताशवृत्त्या ते पीडामुपयान्ति मेषसंस्थे।।३५।।**

पाञ्चालाः पाञ्चालजनाः, कलिङ्गाः, शूरसेनाः, काम्बोजाः, उड्राः, किराता- एते सर्वे जनाः। तथा शस्त्रवार्ताः शस्त्रवृत्तयः शस्त्रं वर्तनं येषाम्। ये च हुताशवृत्या अग्निवृत्या ज जीवन्ति सुवर्णकारादयः। ते सर्वे पीडमुपयान्ति प्राप्नुवन्ति मेषसंस्थितेऽर्के चन्द्रे वा ग्रस्ते।

अथ वृष वाह-

**गोपाः पशवोऽथ गोमिनो मनुजा ये च महत्त्वमागताः।**
**पीडामुपयान्ति भास्करे ग्रस्ते शीतकरेऽथवा वृषे।।३६।।**

**मिथुने प्रवराङ्गनाः नृपा नृपमात्रा बलिनः कलाविदः।**
**यमुनातटजाः सबाह्लिका मत्स्याः सुह्मजनैः समन्विताः।।३७।।**

**आभीराञ्छबरान् सपह्लवान् मल्लान् मत्स्यकुरूच्छकानपि।**
**पाञ्चालान्विकालंश्च पीडयत्यन्नं चापि निहन्ति कर्कटे।।३८।।**

**सिंहे पुलिन्दगणमेकलसत्त्वयुक्तन् राजोपमान् नरपतीन् वनगोचरांश्च।**
**षष्ठे तु सस्यकविलेखकगेयसक्तन् हन्त्यश्मकत्रिपुरशालियुतांश्च देशान् ३९।।**

**तुलाधरेऽवन्त्यपरान्त्यसाधून् वणिग्दशार्णान् मरुकच्छपांश्च।**
**अलिन्यथोदुम्बरमद्रचोलान्द्रुमान् सयौधेयविषायुधीयान्।।४०।।**

अवन्ती आवन्त्या जनाः, अपरान्त्या जना एव, साधवः सज्जनाः, वणिजः किराटाः, दशार्णा जना एतान् मरुकच्छपाञ्जनांश्च - एतान् सर्वान्, तुलाधरे तुले हन्ति।

अलिन्यथेति। उदुम्बरा जनाः, मद्राः, चोला- एतानपि जनान् द्रुमान वृक्षान्, यौद्येयान् जनान्, विषायुधीयान् विषमायुधं येषां तान् सह यौधेचैर्विषायुधीयान्- एतानलिनि वृश्चिके हन्ति।

अथ धनुर्मकरयोराह-

**धन्विन्यमात्यवरवाजिविदेहमल्लान् पांचालवैद्यवणिजो विषमायुधान्।**
**हन्यान्मृगे तु झषमांत्रिकुलानि नीचान् मंत्रौषधिषु कुशलान् स्थविरायुधीयान्।।४१।।**

अमात्या मन्त्रिणः, वराः प्रधानाः, अथवाऽमात्यवराः, प्रधानाः, वाजिनोऽश्वाः, विदेहा जनाः, मल्ला बाहुयुद्धज्ञाः, पाञ्चाला जनाः, वैद्याः कायचिकित्सकाः, वणिजः क्रयविक्रयिणः, विषमाः, क्रूराः, आयुधज्ञा आयुधवेत्तार- एतान् धन्विनि हत्यान्।

हन्यान्मृगे त्विति। झषा मत्स्याः, मन्त्रिणश्चाणक्यविदः सचिवाः, कुलानि वंशाः, अथवा मन्त्रिणां सचिवानां कुलानि, नीचा अधकर्मकराः -एतान् तथा मन्त्रौषधीषु च कुशलान् मन्त्रेषु शैववैष्णवसौरेषु औषधीषु च कुशलान् शक्तान्,स्थविरान् वृद्धान् आयुधीयानायुधजीविन- एतान् मृगे मकरे हन्यान्।

अथ कुम्भमीनयोराह-

**कुम्भेऽन्तगिरिजानसपश्चिमजनान् भारोद्वहांस्तस्करान्**

**आभीरान्दरदार्यसिंहपुरकान् हन्यात्तथा बर्बरान्।**

**मीने सागरकूलसागरजलद्रव्याणिमान्यान् जनान् प्राज्ञान्वार्युपजीविनश्च भफलं**

**कूर्मोपदेशाद्वदेत्।।४२।। बृ.सं.,पृ-१२२**

**सव्यापसव्यलेहग्रसननिरोधावमर्दनारोहाः।**

**आंध्रांत मध्यतमस्तमोऽन्त्य इति ते दश ग्रासाः।।४३।।**

सव्यः, अपसव्यः, लेहः, ग्रसनम्, निरोधः, अवमर्दनम् , आरोहः, आघ्रातम्, मध्यतमः, तमोऽन्त्ये-इत्येवं प्रकारास्ते दश ग्रासा इति।

अथैतेषां लक्षणानि सफलानि। तत्र सव्यापसव्ययोराह-

**सव्यगते तमसि जगज्जलप्लुतं भवति मुदितमभयञ्च।**

**अपसव्ये नरपतितस्करावमर्दैः प्रजानाशः।।४४।।**

तमसि राहौ सव्यगते चन्द्रस्यार्कस्य वा दक्षिणभागगते जगज्जलप्लुतं वारिणा प्लावितं मुदितं हृष्टमभयं भयरहितं च भवति। अपसव्ये वामभागगते राहौ नरपते राज्ञस्तस्कराणां चौराणामवमर्दैः पीडनैः प्रजानाशः संक्षयो भवति।

अथ चन्द्रग्रहणे आग्नेय्यां राहोरागमनं सव्यः ऐशान्यामपसव्यः। अर्कग्रहणे वायव्ये सव्यो नैर्ऋत्यामपसव्य इति।

अथ लेहस्याह-

**जिह्वेय लेढि परितस्तिमिरनुदो मण्डलं यदि स लेहः।**

**प्रमुदितसमस्तभूता प्रभूततोया च तत्र मही।।४५।।**

तिमिरनुदः। चनद्रस्यार्कस्य वा तिमिरमन्धकारं नुदति प्रेरयतीति तिमिरनुदस्तस्य परितः समन्ततो मण्डलं जिह्वोपलेढि, जिह्वया रसनयोपलीढमिव दृश्यते तथा स ग्रासो लेह इति। तत्र तस्मिन् ग्रासे मही भूः प्रमुदितसमयस्तभूता प्रकर्षेण मुदिता हर्षिताः समस्ता भूता जना यस्यां तथा प्रभूततोया वारिबहुला च भवति।

अथ ग्रसनस्याह-

**ग्रसनमिति यदा व्यंश : पादो वा गृह्यतेऽथवाप्यर्द्धम्।**

**स्फीतनृपवित्तहानिः पीडा च स्फीतदेशानाम्।।४६।।**

त्र्यंशस्त्रिभागः। पादचतुर्थभागः। अर्द्ध वा बिम्बार्द्ध गृह्यते तमसाऽऽच्छाद्यते तदा स ग्रासो ग्रसनमिति। तस्मिन् ग्रासे स्फीतानामतिविभवयुक्तानां नृपाणां राज्ञां वित्तहानिर्धननाशो भवति। तथा स्फीतानां सधनानां च देशानां पीडा भवति।

अथ निरोधस्याह-

**पर्यन्तेषु गृहीत्वा मध्ये पिण्डीकृतं तमस्तिष्ठेत्।**

**स निरोधो विज्ञेयः प्रमोदकृत् सर्वभूतानाम्।।४७।।**

तमो राहुः पर्यन्तेषु गृहीत्वा समन्ततः सञ्छाद्य मध्ये मध्यभागे पिण्डीकृतं घनतरं भूत्वा यदि तिष्ठेत्तदा स ग्रासो निरोधसंज्ञो विज्ञेयो ज्ञातव्यः। स च सर्वभूतानां निःशेषप्राणिनां प्रमोदकृतं हर्षकृत्।

अथावमर्दनमाह-

**अवमर्दनमिति निःशेषमेव सञ्छाद्य यदि चिरं तिष्ठत्।**

**हन्यात् प्रधानदेशान् प्रधानभूपांश्च तिमिरमयः।।४८।।**

तिमिरमयो राहुर्निः शेषं समग्रमेव मण्डलं सञ्छाद्य स्थगयित्वा यदि चिरं बहुकालं तिष्ठेत् तदाऽवमर्दनं नाम ग्रासस्तेन ग्रासेन प्रधानभूपान प्रधानान् नृपान् प्रधानांश्च देशान् हन्याद् घातयेत।

अथाऽऽरोहणस्याह-

**वृत्ते ग्रहे यदि तमस्तत्क्षणमावृत्य दृश्यते भूयः।**

**आरोहणमित्यन्योऽन्यमर्दनैर्भयकरं राज्ञाम्।।४९।।**

ग्रहे ग्रहणे वृत्ते निवृत्तेऽतिक्रान्ते भूयः पुनर्यदि चेत्तमो राहुस्तत्क्षणमावृत्य पुनश्छादयन् तिष्ठेत् तदाऽऽरोहणं नाम ग्रासः। तच्च राज्ञां नृपाणामन्योऽन्यमर्दनैः परस्परावमर्दनैर्भयं भीतिं करोति। इतिशब्दः प्रकाशर्थे। एतदौत्पातिकम्। यतो नोत्पद्यते गणितगोलवासनया। आचार्येण पूर्वशास्त्रानुसारेणोक्तम्।

अथाऽघ्रातस्याह-

**दर्पण इवैकदेशे सबाष्पनिः श्वासमारुतोपहतः।**

**दृश्येताघ्रातं तत् सुवृष्टिवृद्धयावहं जगतः।।५०।।**

दर्पण आदर्श इवैकदेशे एकस्मिन् स्थाने सबाष्पेण सोष्मणा निः श्वासमारुतेन श्वासवायुना चोपहतो दृश्येतावलोक्येत तदाऽऽघ्रातं नाम ग्रासः। तच्च जगतः सुवृष्टिवृद्धयावहं शोभनां वृष्टिं वृद्धिं च वहति जगतो जनपदस्य।

अथ मध्यतमस आह-

**मध्ये तमः प्रविष्टं वितमस्कं मण्डलं च यदि परितः।**

**तन्मध्यदेशनाशं करोति कुक्ष्यामयभयं च।।५१।।**

तमो राहुर्मध्येऽन्तर्यदि प्रविष्टो दृश्यते परितः समन्ततो मण्डलं वितमस्कं तमोरहितं निर्मल भवति तदा ग्रासो मध्यतमो नाम। तच्च मध्यदेशस्य नाशं विघातं करोति तथा कुक्ष्यामयभयं कुक्षिरोगभयं च।

अस्य ग्रासस्य संस्थानमर्कग्रहण एव सम्भवति छादकस्येन्दोरल्पत्वात्। चन्द्रग्रहणे छाद्यस्याल्प-त्वाच्छादकस्य च भूच्छायाया महत्त्वान्न सम्भवति।

अथ तमोऽन्त्याख्यस्याह-

**पर्यन्तेष्वतिबहुलं स्वल्पं मध्ये तमस्तमोऽन्त्याख्ये।**

**सस्यानामितिभयं भयमस्मिस्तस्कराणां च।।५२।।**

तमः पर्यन्तेषु बिम्बपरिध्यन्तर्भागेषु। अतिबहुलमतिधनं मध्ये मध्यभागे स्वल्पमत्यल्पं दृश्यते तदा स ग्रासस्तोऽन्त्याख्यो नाम। अस्मिंस्तमोऽन्त्याख्ये ग्रासे सस्यानामीतिभयं भवति। ईतयः सस्योपद्रवाः। तथा च -

आभ्यः सस्यानां भयं तथा तस्कराणां चौराणां भयं भवति। चौरकृता भीतिर्भवतीत्यर्थः। तथा च पराशरः- **बृ.सं.,पृ-१२५**

**श्वेते क्षेमसुभिक्षं ब्राह्मणपीडां च निर्दिशेद्राहौ।**

**अग्निभयमनलवर्णे पीडा च हुताशवृत्तीनाम्।।५३,५४,५५,५६।।**

**पांशुविलोहितरूपः क्षत्रध्वंसाय भवति वृष्टेश्च।**

**बालरविकमलसुरचापरूपभृच्छस्त्रकोपाय।।५७,५८,५९।।**

**पश्यन् ग्रस्तं सौम्यो घृतमधुतैलक्षयाय राज्ञां च।**

**भौमः समरविमर्दशिखिकोपं तस्करभयं च॥६०॥**

**शुकः सस्यविमर्दं नानाल्लेशांस्त्र जनयति धरित्र्याम्।**

**रविजः करोत्यवृष्टिं दुर्भिक्षं तस्करभयं च॥६१॥**

सौम्यो बुधो ग्रस्तमर्कं चन्द्रं वा पश्यति तदा घृतमधुतैलानां राज्ञां नृपाणां च क्षयाय नाशाय भवति। भौमश्चेत् पश्यति तदा समरविमर्दं युद्धं शिखिकोपमग्निप्रकोपं तस्करभयं चौरभयं च करोति।

शुक्रश्चेत् पश्यति तदा सस्यविमर्दं सस्यविनाशं धरित्र्यां भूमौ नानाक्लेशान् अनेकान बसकृच्छ्रान जनयत्युत्पादयति। रविजः सौरिश्चेत् पश्यति तदाऽवृष्टिमवर्षणं दुर्भिक्षं तस्करभयं चौरभीतिं च करोति।

अधुना शुभदृष्टेः प्रशंसार्थमाह-

**यदशुभमवलोकनाभिरुक्तं ग्रहजनितं ग्रहणे प्रमोक्षणे वा।**

**सुरपतिगुरुणावलोकिते तच्छममुपयाति जलेरिवाग्निरिद्धः॥६२॥**

पश्यन् ग्रस्तं सौम्य इत्यादिकाभिरवलोकनाभिर्दृष्टिभिर्ग्रहजनितं ग्रहोत्पादितं यदुक्तमशुभं फलं ग्रहणकाले वा तत्सर्वं सुरपतिगुरुणा बृहस्पतिनाऽवालोकिते दृष्टे शमं शान्तिमुपयाति गच्छति। यथा जलैरम्बुभिरिद्धः प्रज्वलितोऽग्निर्हुतवह इति। ग्रहणे प्रमोक्षणे वेत्यत्र विकल्पः कृतः। यदि कदाचिद् ग्रहणकाले योऽसौ दृश्यो द्रष्टा च ग्रहः स एव राश्यन्तरं संक्रामति, तदा तानि फलानि न भवन्ति। तेन ग्रहणे मोक्षान्तुदृष्टिफलमभिमतमिति।

अथ प्रगहणकालाद् मोक्षान्तं यावद् ग्रहणसमयस्तन्मध्ये उत्पातैर्दृष्टैरन्यस्य ग्रहणस्य परिज्ञानमाह-

**ग्रस्ते क्रमान्निमित्तैः पुनर्ग्रहो मासषट्कपरिवृद्धया।**

**पवनोल्कापातरजः क्षितिकम्पतमोऽशनिनिपातै :॥६३॥**

**आवन्तिका जनपदाः कावेरीनर्मदातटाश्रयिणः।**

**दृप्ताश्च मनुजपतयः पीडयन्ते क्षितिसुते ग्रस्ते॥६४॥**

**अन्तर्वेदी सरयूं नेपालं पूर्बसागरं शोणम्।**

**स्त्रीनृपयोधकुमारान् सह विद्वद्भिर्बुधो हन्ति॥६५॥**

**ग्रहणोपगते जीवे विद्वन्नृपमान्त्रिगजहयध्वंसः।**

**सिन्धुतटवासिनामप्युदग्दिशं संश्रितानां च।।६६।।**

जीवेबृहस्पतौ ग्रहणोपगते ग्रहणं प्राप्ते विदुषां पण्डितानां नृपाणां राज्ञां मन्त्रिणां सचिवानां गजानां हस्तिनां हयानामश्वानां च ध्वंसो विनाशो भवति। तथा सिन्धुर्नाम नदी तत्तवटवासिनो ये तेषामपि। तथोदग्दिशं संश्रितानामुत्तरदिग्वासिनां जनानां च ध्वंस एव भवति।

अथ शुक्रस्याह-

**भृगुतनये राहुगते दाशेरकाः कैकयाः सयौघेयाः।**

**आर्यावर्त्ताः शिबयः स्त्रीसचिवगणाश्च पीडयन्ते।।६७।।**

भृगुतनये शुक्रे राहुगते ग्रस्ते सति दाशेरकाः जनाः। कैकयाः सयौधेयाः सह यौधेयैर्जनैः। आर्यावर्त्ता प्रधानदेशजनाः। शिबयो जनाः। स्त्रियो योषितः। सचिवा मत्रिणः। गणाः समूहाः। एते सर्व एव पीड्यन्ते उपतप्यन्ते।

अथ सौरास्याह-

**सौरे मरुभुवपुष्करसौराष्ट्रा धावतोऽर्बुदान्त्यजनाः।**

**गोमन्तपारियात्राश्रिताश्च नाशं व्रजन्त्याशु।।६८।।**

सौरे शनैश्चरे ग्रस्ते मरुभवा मरुभूमावृत्पत्तिर्येषां ते। पुष्करजनाः। सौराष्ट्रिकाः। धातवो धातुद्रव्याणि। अर्बुदजनाः अर्बुदः पर्वतस्तत्र ये निवसन्ति। अन्त्यजना निकृष्टजनाः। गोमन्तो गोमिनः केचिद् गोनन्द इति पठन्ति, गोनन्दा जनाः। पारियात्राश्रिताश्च पारियात्रः पर्वतस्तत्र ये आश्रिताः स्थिता एते सर्व आशु क्षिप्रमेव नाशं व्रजन्ति गच्छन्ति।

अथ मासफलं वक्तुकामस्तत्रादावेव कार्तिकस्याह-

**कार्तिक्यामनलोपजीविमगधान् प्राच्याधिपान् कोशलान्।**

**कल्माषानथ शूरसेनसहितान् काशींश्च सन्तापयेत्।**

**हन्याच्वाशु कलिङ्गदेशनृपतिं सामात्यभृत्यं तमो**

**दृष्टं क्षत्रियपातपदं जनयति क्षेमं सुभिक्षान्वितम्।।६९।।**

**काश्मीरकान् कौशलकान् सपुण्ड्रान् मृगांश्च हन्यादपरान्कांश्च।**

**ये सोमपास्तांश्च निहन्ति सौम्ये सुवृष्टिकृत् क्षेमसुभिक्षकृच्च।।७०।।**

सौम्ये मार्गशीर्षमासे राहुर्दुष्टः काश्मीरकान् जनान् कोशलांश्च सपुण्ड्रान् पुण्ड्रैर्जनैः सहितान्। मृगा अरण्यप्राणिनस्तानपि। अपरान्तकान् जनान्। एतानपि हन्यान्नाशयेत्। तथा ये सोमपाः सोमं पींत यैस्ते कृतयज्ञास्तांश्च निहन्ति। सुवृष्टिकृत् शोभनां वृष्टिं करोति। क्षेमसुभिक्षकृच्च क्षेमं सुभिक्षं च करोति। अथ पौषस्याह-

**पौषे द्विजक्षत्रजनोपरोधः ससैन्धवाख्याः कुकुरा विदेहाः।**

**ध्वंसं व्रजन्त्यत्र च मन्दवृष्टिं भयं च विद्यादसुाभक्षयुक्तम्।।७१।।**

**माघे तु मातृपितृभक्तवसिष्टगोत्रान् स्वाध्यायधर्मनिरतान् करिणस्तुरङ्गन्।**

**वङ्गाङ्गकाशिमनुजाश्च दुनति राहुर्वृष्टिं च कर्षकजनानुमतां करोति।।७२।।**

**पीडाकरं फाल्गुनमासि पर्व वङ्गाश्मकावन्तकमेकलानाम्।**

**नृत्तज्ञसस्यप्रवराङ्गनानां धनुष्करक्षत्रतपस्विनां च।।७३।**

**चैत्रे तु चित्रकरलेखकगेयसक्तानं गरूपोपजीविनिगमज्ञहिरण्यपण्यान्।**

**पौण्ड्रौड्रकैकयजनानथ चाश्मकांश्च तापः स्पृशत्वरपोऽत्र विचित्रवर्षी।।७४।।**

चैत्र्याममावास्यानां पौर्णमास्यां वा चित्रकराश्चित्रज्ञाः शिल्पिनः, लेखका लिपिज्ञाः, गेयसक्त गीतरता एतान्। तथा रूपोपजीविनो वेश्याजनाः। निगमा वेदपाठकाः। हरिण्यपण्याः, सुवर्णविक्रयिणः एतानपि। तथा पौण्ड्रा जनाः। औड्राः, कैकया एते सर्व एव जनाः। अथशब्दः पादपूरणे। अश्काश्च जना एव, एतान सर्वान् तापः सन्तापः स्पृश्यति। एते पीडिता भवन्तीत्यर्थः। अत्रास्मिन् वर्षे अमरप इन्द्रो विचित्रवर्षी। विचित्रं नानाप्रकारं वर्षति। क्वचित्र वर्षति क्वचिद्वर्षतीत्यर्थः। केषाश्चित् पाठः- अमराडपि चित्रवर्णः।

अथ वैशाख आह-

**वैशाखमासि ग्रहणे विनाशमायान्ति कार्पासतिलाः समुद्राः।**

**इक्ष्वाकुयौघेयशकाः कलिङ्गाः सोपद्रवाः किन्तु सुभिक्षमस्मिन्।।७५।।**

वैशाखमासे ग्रहणे कर्पासास्तिलाः समुद्गा मुद्गसहिता एते विनाशमायान्ति गच्छन्ति। तथेक्ष्वाकवो जना यौधेयाः शका कलिङ्ग एते सर्वे सोपप्लवाः सोपद्रवाः। किन्तु पुनरस्मिन् ग्रहणे सुभिक्षं च भवति।

अथ ज्येष्ठा आह-

**ज्येष्ठे नरेन्द्रद्विजराजपत्न्यः सस्यानि वृष्टिश्च महागणाश्च।**

**प्रध्वंसमायान्ति नराश्च सौम्याः साल्वैफ समेताश्च निषादसघाः।।७६।।**

**आषाढपर्वण्युदपनिवप्रनदीप्रावहान् फलमूलवार्त्तान्,।**

**गान्धारकाश्मीरपुलिन्दचीनान् हतान् वदेन्मण्डल-वर्षमस्मिन्।।७७।।**

आषाढपर्वण्याषाढे मासे ग्रहणे उदपानं जलाधारो वापीकूपतडागादिस्तस्य चोदपानस्य वप्रस्तटः। नदीप्रवाहः पुलिनविस्तिरम्। फलमूलवार्ताः फलानि मूलानि वार्त्ता वर्तनं वृत्तिर्येषां ते। तथा गान्धारा जनाः। काश्मीराः। पुलिन्दाः। चीनाः। एतान् सर्वानं हतान् नष्टानिति वदेत्। सर्व एव नश्यन्तीत्यर्थः। अस्मिन् पर्वणि मण्डलवर्ष भवति। क्वचित् क्वचिद्वर्षतीत्यर्थः।

अथ श्रावण आह-

**काश्मीरान् सपुलिन्दचीनयवनान् हन्यात् कुरुक्षेत्रकान्**

**गान्धारानपि मध्यदेशसहितान् दृष्टो ग्रहः श्रावणे।**

**काम्बोजैकशफांश्च शारदमपि त्यक्त्वा यथोक्तनिमा-**

**नन्यत्रप्रचुरान्नहृष्टमनुजैर्धात्रीं करोत्यावृताम्।।७८।।**

**कलिङ्गवङ्गान् मगधान् सुराष्ट्रान् म्लेच्छान् सुवीरान् दरदाञ्छकांश्च।**

**स्त्रीणां च गर्भानसुरो निहन्ति सुभिक्षकृद्भाद्रपदेऽभ्युपेतः।।७९।।**

असुरो राहुर्भाद्रपदे मास्यभ्युप्रेत आगतः कलिङ्गान् जनान्। वङ्गान्। मगधान् सुराष्ट्रान्। म्लेच्छान्। सुवीरान् दरदान्। अश्कान्। एतान् सर्वान्निहन्ति घातयति। केचिद्दरदाञ्छकानिति पठन्ति। तथा स्त्रीणां योषितां गर्भान् निहन्ति। सुभिक्षकृत् सुभिक्षं करोति।

अथाश्वयुज्याह-

**काम्बोजचीनयवनान् सह शल्यहृद्भिर्बाह्लीकसिन्धुतटवासिजनांश्च हन्यात्।**

**आनर्तपौण्ड्रभिषजश्च तथा किरातान् दृष्टोऽसुरोऽश्वयुजि भूरिसुभिक्षकृच्च।।८०।।**

तथा च पराशरः- तत्र कार्त्तिके सुभिक्षक्षेमाय काशिकोशलशूरसेनाऽभावाय च। मार्गशीर्षे मृगपौण्ड्रसोमभयाय वृष्टये च। पौषे भयदुर्भिक्षब्रह्मक्षत्रोपरोधाय। माघे शस्त्रप्रकोपाय प्रावृड्वृद्धये वङ्गनर्त्तकयवनकाशिदेशोत्सादनकृत्। फाल्गुनेऽन्नसम्पच्च। नटनर्त्तकधनुष्कर-सस्यविनाशाय चैत्रे। वैशाखे-ऽश्मकपौण्ड्रोड्रम्लेच्छवृक्षसस्याभावाय। ज्येष्ठे ज्येष्ठपत्नीगण-

मुख्यसस्योपद्रवाय। साल्वनिषादवृष्टि-सस्यध्नमाषाढे। श्रावणे क्षेमसुभिक्षमन्यत्र चीनकाश्मीरपुलिन्दगान्धारेभ्यः। भाद्रपदे मगधदरदकलिङ्ग-वङ्गऽनयाय सस्यक्षेमाय च। आश्वयुगग्रहणे सुभिक्षक्षेमाय आवन्तिवाह्लीकानर्त्तकाम्बोजसैन्धवाऽऽमयाये ति।

अथार्कशशिनोर्दश मोक्षा भवन्ति तेषां नामान्याह-

**हनुकुक्षिपायुभेदाद्विद्विः सञ्छर्दने च जरणं च।**

**मध्यान्तयोश्च विदरणमिति दश शशिसूर्ययोर्मोक्षाः।।८१।।**

हनुकुक्षिपायुभेदा द्विर्द्विः। द्वौ द्वौ वारो द्विर्द्विः। हनुभेदा द्वौ। कुक्षिभेदौ द्वौ। पायुभेदौ द्वाविति षट्। सञ्छर्दनं च जरणं च। चकारः समुच्चये। तथा मध्यविदरणमन्त्यविदरणम्। इत्येवंप्रकाराः शशिसूर्ययोश्चन्द्रार्कयोर्दश मोक्षाः।

अथैतेषां लक्षणं सफलं वक्तुकामस्तत्रादावेव दक्षिणहनुभेदस्य लक्षणं फलं चाह-

**आग्नेय्यामपगमनं दक्षिणहनुभेदसंज्ञितं शशिनः।**

**सस्यविमर्दो मुखरुग् नृपपीडा स्यात् सुवृष्टिश्च।।८२।।**

**पूर्वोत्तरेण वामो हनुभेदो नृपकुमारभयदायी।**

**मुखरोगं शस्त्रभयं तस्मिन् विद्यात् सुभिक्षं च।।८३।।**

पूवोत्तरेणैशान्यां दिशि अपगमनं राहोर्यदि भवति तदा स वामो हनुभेदो नाम मोक्षः। स च नृपकुमाराणां नृपपुत्राणां भयदायी भवति भीतिं ददाति। तस्मिंश्च मोक्षे मुखरोगं वक्त्रपीडां शस्त्रभयं संग्रामभीतिं च विन्द्याज्जानीयात्। सुभिक्षं च भवति। तथा च कश्यपः- **बृ.सं.,पृ-१३६**

अथ दक्षिणकुक्षिविभेदलक्षणं सफलमाह-

**दक्षिणकुक्षिविभेदो दक्षिणपार्श्वेन यदि भवेन्मोक्षः।**

**पीडा नृपपुत्राणामभियोज्या दक्षिणा रिपवः।।८४।।**

**वामस्तु कुक्षिभेदो यद्युत्तरमार्गसंस्थितो राहुः।**

**स्त्रीणां गर्भविपत्तिः सस्यानि च तत्र मध्यानि।।८५।।**

राहुर्यद्युत्तरमार्गसंस्थितः उत्तरस्यां दिशि संस्थितो भवति तदा स वामकुक्षिभेदो नाम मोक्षः। तस्मिन् मोक्षे स्त्रीणां योषितां गर्भविपत्तिर्गर्भविनाशो भवति। तथा सस्यानि मध्यानि भवन्ति नाल्पानि न बहूनीत्यर्थः। एतदौत्पातिकम्। तथा च कश्यपः- **बृ.सं.,पृ-१३६**

अथ दक्षिणवामौ पायुभेदौ सफलावाह-

**नैर्ऋतवायव्यस्थौ दक्षिणवामौ तु पायुभेदौ द्वौ।**

**गुह्यरुगल्पा वृष्टिर्द्वयोस्तु राज्ञीक्षयो वामे।।८६।।**

**पूर्वेण प्रग्रहणं कृत्वा प्रागेव चापसर्पेत।**

**सञ्छर्दनमिति तत् क्षेमसस्यहादिप्रदं जगतः।।८७।।**

पूर्वेण पूर्वस्यां दिशि प्रग्रहणं कृत्वा प्रागेव पूर्वस्यामेव यद्यपसर्पेत गमनं करोति स मोक्षः सञ्छर्दनमिति। तच्च जगतो लोकस्य क्षेमप्रदं सस्यप्रदं हार्दिप्रदं तुष्टिप्रदं स भवति। तथा च कश्यपः- **बृ.सं.,पृ-१३८**

अथ जरणं सफलमाह-

**प्राक्प्रग्रहणं यस्मिन् पश्चादपसर्पणं तु तज्जरणम्।**

**क्षुच्छस्त्रीभयोद्वगांः क शरणमुपयान्ति तत्र जनाः।।८८।।**

**मधये यदि प्रकाशः प्रथमं तन्मव्यविदरणं नाम।**

**अन्तः कोपकरं स्यात् सुभिक्षदं नातिवृष्टिकम्।।८९।।**

प्रथममादौ मध्यभागे यदि प्रकाशो बिम्बस्य प्राकाश्यमुत्पद्यते तन्मध्यविदरणं नाम मोक्षः। तदन्तः कोपरकम्। अन्तरभ्यन्तरे राजगृहते कोपकरम्। स्वयमेव सैन्यमोक्षभकरं स्याद्भवेत्। तथा सुभिक्षदं सुभिक्षं ददाति। नातिवृष्टिकरं भवति प्रभूतं न वर्षतीत्यर्थः। एतदप्यौत्पातिकम्। यतो गणितगोलविरुद्धम्। तथा च कश्यपः-

अथान्त्यविदरणाख्यं सफलमाह-

**पर्यन्तेषु विमलता बहुलं मध्ये तमोऽन्तदरणाख्ये।**

**मध्याख्यदेशनाशः शारदसस्यक्षयश्चास्मिन।।९०।।**

पर्यन्तेषु बिम्बान्तभागेषु यदि विमलता निर्मलत्वं भवति मध्ये मध्यभागे बहुलं सन्ततं तमस्तदान्त्यदरणाख्यो मोक्षः। अस्मिन् मोक्षे मध्याख्यस्य देशस्य नाशो भवति। मध्यदेशो विनश्यतीत्यर्थः। तथा शारदानां सस्यानां च क्षयः। एतदाप्यौत्पातिकम्। यतो गणितगोलविरुद्धमिति। तथा च कश्यपः- **बृ.सं.,पृ-१३९**

अथैत एव मोक्षा भास्करस्य ज्ञेया इत्येतदाह-

**एते सर्वे मोक्षा वक्तव्या भास्करेऽपि किन्त्वत्र।**

**पूर्वा दिक् शशिनि यथा तथा रवौ पश्चिमां कल्प्या।।९१।।**

एते सर्वे मोक्षां ये चन्द्रमस्युक्तस्ते सर्वे भास्करे सूर्येऽपि वक्तव्याः कथनीयाः। किन्त्वत्रायं विशेषः- यथा शशिनि चन्द्रे पूर्वा दिक् तथा रवावादित्ये पश्चिमा दिक् कल्प्या। एतदुक्तं भवति – आदित्यस्य पश्चिमा दिक् पूर्वा, च पश्चिमा। दक्षिणां उत्तरा। उत्तरा च दक्षिणा। विदिशश्चानेनैव वैलोम्येन परिकल्प्य चन्द्रवद् मोक्षा वाच्या इति।

अथ ग्रहणे मुक्ते सप्ताहान्तः फलान्याह श्लोकपञ्चकेन-

**मुक्ते सप्ताहान्तः पांसुनिपातोऽन्नसङ्क्षयं कुरुते।**

**नीहारो रोगभयं भूकंपः प्रवरनृपमृत्युम्।।९२,९३,९४।।**

**अविकृतसलिलनिपाते सप्ताहान्तः सुभिक्षमादेश्यम्।**

**पश्चादशुभं ग्रहणजं तत् सर्वं नाशमुपयति।।९५,९६।।**

**सोमग्रहे निवृते पक्षान्ते यदि भवेद् ग्रहोऽर्कस्य।**

**तत्रानयः प्रजानां दम्पत्योर्वैरमन्योन्यम्।।९७।।**

सोमग्रहे चन्द्रग्रहणे निवृत्तेऽतीते पक्षान्ते दिनपञ्चदशकात्परतो यदि ग्रहो ग्रहणकर्मस्याऽऽदित्यस्य भवति तत्र तस्मिन् प्रजानां लोकानामनयो दुर्नयो भवति। दम्पत्योर्जायापत्योरन्योन्यं परस्परं वैरं द्वेषो भवति।

अथार्कग्रहाच्छशिग्रहणं दृष्टं फलमाह-

**अर्कग्रहात्त शशिनो ग्रहणं यदि दृश्यते ततो विप्राः।**

**नैककेतुफलभाजो भवन्ति मुदिताः प्रजाश्चैव।।९८।।**

# ४. भौमचाराध्यायः

एतेषां लक्षणानि सफलानि वक्ष्यति। तत्रादावेवोष्णमुखस्य लक्षणं सफलमाह-

**यद्युदयर्क्षाद्वक्रं करोति नवमाष्टसप्तमर्क्षेषु।**

**तद्वक्रमुष्णमुदये पीडाकरमग्निवार्त्तानाम्।।१।।**

यस्मिन्नक्षत्रे स्थितोऽङ्गारक आदित्यमण्डलादुदयं करोति तदुदयर्क्षादुदयनक्षत्राद् नवमाष्टस्पमर्क्षेषु नवमे नक्षत्रे अष्टमे वा सप्तमे वा यदि वक्रं प्रतीपगमनं करोति तदा तद्वक्त्रमुष्णं नाम। तच्च भौमस्योदये रविमण्डलात् पुनरपि निर्गमेऽग्निवार्तानामग्निवृत्तीनां सुवर्णकारलोहाकारदीनां पीडाकरमुपतापकरम्। वक्रादनन्तरं यदाऽर्कमण्डलेऽस्तमेष्यति तदैतत्फलमेषां सर्वेषां ज्ञेयम्। यत्र यद्यप्यसम्भवस्तत्रापि पूर्वशास्त्रानुसारेणाऽऽचार्येणोक्तम्। तथ च वृद्धगर्गः- **बृ.सं.,पृ-१४४**

तथा च पराशरः - तस्य पञ्चवक्त्राणि क्रमेणोपदिशन्ति। उष्णमश्रुमुखं व्यालं लोहिताख्यं निस्त्रंशमुशलं चेति। तत्रोदयर्क्षात् सप्तमाष्टनवमेषु नक्षत्रेषु निवृतः प्रजासंक्षयं विशेषतः पचतां दहतां च पीडां धत्ते।

अथाश्रुमुखस्याह-

**द्वादशदशमैकादशनक्षत्राद्वक्रिते कुजेऽश्रुमुखम्।**

**दूषयति रसानुदये करोति रोगानवृष्टिश्च।।२।।**

उदयनक्षत्राद् द्वादशे नक्षत्रे दशमे वैकादशे वा कुजेऽङ्गारके वक्रिते प्रतिपगतौ अश्रुमुखं नाम वक्त्रम। तच्चोदये पुनरर्कमण्डलान्निर्गमे रसान् मधुराम्ललवणतिक्तकटुकषायान् दूषयति सदोषान् करोति। ते च दुष्टा नराणां भक्षणमात्रात् पीडामुत्पादयन्ति। एवं रोगान् करोति। तथा अवृष्टिमवर्षणं च करोति तथा च गर्गः - **बृ.सं.,पृ-१४४**

पराशरः – दशमैकादशद्वादशेषु प्रदुष्टवातैरद्रव्यरसान् प्रजानां धातृन् कोपयन् व्याधीन् प्रवर्त्तयति।

अथ व्यालस्याह-

**व्यालं त्रयोदशर्क्षाच्चतुर्दशाद्वा विपच्यतेऽस्तमये।**

**दंष्ट्रिव्यालमृगेभ्यः करोति पीडां सुभिक्षं च।।३।।**

उदयापेक्षया त्रयोदशर्क्षात् त्रयोदशनक्षत्राच्चतुर्दशाद्वा कुजे वक्रिते व्यालं नाम वक्रम्। तच्चास्तमये विपच्यते। यस्मिन् काले भौमोऽर्कमण्डले पुरस्तादस्तमेति तत्र परिपाकमायाति। दंष्ट्रिणः सूकर-कुक्कुरादयः। व्यालाः सर्पाः। मृगा आरण्यजातयः। तेभ्यः सकाशात् पीडां लोकानां करोति सुभिक्षं च करोति। तथा च गर्गः – **बृ.सं.,पृ-१४४**

अथ रुधिराननस्याह-

**रुधिराननमिति वक्रं पञ्चदशात् षोडशाच्च विनिवृत्ते।**

**तत्कालं सुखरोगं सभयं च सुभिक्षमावहति।।४।।**

उदयापेक्षया पञ्चदशान्नक्षत्रात् षोडशाच्च विनिवृत्ते वक्रितेऽङ्गारके रुधिराननमिति नाम वक्त्रम्। तच्च तत्कालं यावद्वक्रं तावन्मुखरोगं वक्त्रं पीडितं सभयं भयसहितं च सुभिक्षमावहत्युत्पादयति तथा च गर्गः- **बृ.सं.,पृ-१४५**

अथासिमुशलस्याह-

**असिमुसलं सप्तदशादष्टादशतोऽपि वा तदनुवक्रे।**

**दस्युगणेभ्यः पीडां करोत्यवृष्टिं सशस्त्रभयम्।।५।।**

उदयापेक्षया सप्तदशान्नक्षत्रादष्टादशतोऽपि वा वक्रितेऽङ्गारके वद्वक्त्रमसिमुशलं नाम। तच्चानुवक्रे स्पष्टगत्याऽऽश्रिते भौमे दस्युगणेभ्यश्चौरसंघेभ्यः सकाशात् प्रजानां पीडां करोति। तथाऽवृष्टिं सशस्त्रभयां शस्त्रभयेन सहितां च करोति। तथा च गर्गः - **बृ.सं.,पृ-१४५**

अथात्रैव योगवशेन विशेषफलमाह-

**भाग्यार्यमोदितो यदि निवर्त्तते वैश्वदैवते भौमः।**

**प्राजापत्येऽस्तमितस्त्रीनपि लोकान्निपीडयति।।६।।**

भाग्यं पूर्वफल्गुनी। अर्यमा उत्तरफल्गुनी। भौमोऽङ्गारकोऽनयोरेकतरे यद्युदितो भवति रविमण्डलनिर्गतः। ततोऽग्रतो वैश्वदैवते उत्तराषाढायां निवर्तते वक्रं करोति तथा प्राजापत्ये रोहिण्या-मस्तमितो यदि भवति तदा त्रीनपि भूर्भुवः स्वराख्यांल्लोकान्निपीडयत्युपतापयति।

अन्यदपि विशेषमाह-

**श्रवणोदितस्य वक्रंभ पुष्ये मूर्धाभिषिक्तपीडाकृत्।**

**यस्मिन्नृक्षेऽभ्युदितस्तद्दिग्व्यूहान जनान् हन्ति।।७।।**

श्रवणस्थस्याङ्गारकस्यार्कमण्डलादुदितस्य यद्यग्रस्तः पुष्ये वक्रं भवति तदा मूर्द्धाभिषिक्तानां राज्ञां पीडां करोति। तथा च पराशरः - **बृ.सं.,पृ-१४६**

**मध्येन यदि मघानां गतागतं लोहितः करोति ततः।**

**पाण्डयो नृपो विनश्यति शस्त्रोद्योगाद्भयमवृष्टिः।।८।।**

**भित्त्वा मघां विशाखां भिन्दन् भौमः करोति दुर्भिक्षम्।**

**मरकं करोति घोरं यदि भित्त्वा रोहिणी याति।।९।।**

भौमोऽङ्गारको मघां भित्त्वा मघायोगतारकाभेदं कृत्वा यदि विशाखां भिन्दन् तामपि पुनर्भिनत्ति तदा दुर्भिक्षं क्षुद्भयं करोति। यदि रोहिणीं भित्त्वा याति रोहिण्यां योगतारकभेदनं कृत्वा गच्छति तदा घोरं तीव्रं मरकं जनानां करोति विदधाति।

अन्यदप्याह-

**दक्षिणतो रोहिण्याश्चरन् महीजोऽर्धवृष्टिनिग्रहकृत्।**

**धूमायन् सशिखो वा विनिहन्यात् पारियात्रस्थान्।।१०।।**

महीजोऽङ्गारको रोहिण्या दक्षिणतश्चरन् रोहिण्या योगतारछस्य- दक्षिणभागेन गच्छन् अर्घस्य वृष्टेश्च निग्रहं करोति विनाशयतीत्यर्थः। अर्धस्य निग्रहः स्वल्पत्वम्। वृष्टेर्निग्रहश्चाभावः। धूमायन सशिखो वेति। धूमायन् धूममुद्वहन् सशिखः सचूडो वा यदि दृश्यते तदा पारित्रस्थान् विनिहन्यात्। पारियात्रः पर्वतः। तत्र स्थितान् जनान् हन्याद् घातयेत्।

अथ भौमस्य वार्षिकाणि नक्षत्राण्याह-

**प्राजापत्ये श्रवणे मूले तिसृषूत्तरासु शाके च।**

**विचरन् घननिवहानामुपघातकरः क्षमातनयः।।११।।**

**चारोदयाः प्रशस्ता : श्रवणमघादित्यमूलहस्तेषु।**

**एकपदाश्विविशाखाप्राजापत्येषु च कुजस्य।।१२।।**

यस्मिन्नृक्षेऽभ्युदितस्तद्दिग्व्यूहान् जनान् हन्ति तथा प्राजापत्ये श्रवण इत्यस्यापवादोऽयम्। कुजस्याङ्गारकस्य श्रवणे मघायामादित्ये पुनर्वसौ हस्ते मूले एकपदायां पूर्वभदपदायामश्विन्याः विशाखायां प्राजापत्ये रोहिण्याम्। चशब्दः समुच्चये। एतेषु नक्षत्रेषु

चारोदया चारश्चरणमवस्थितिः। उदयः सूर्यमण्डलादुद्गमनम्। प्रशस्ताः शोभनाः। पूर्वोक्तम्शुभफलमत्र न भवतीत्यर्थः।

अथ वर्णलक्षणमाह-

**विपुलविमलमूर्त्तिः किंशुकाशोकवर्णः स्फुटरुचिरमयूखस्तप्तताम्रप्रभाभः।**
**विचरति यदि मार्गे चोत्तरं मेदिनीजः शुभकृदवनिपानां हार्दिदश्च प्रजानाम्।।१३।।**

यदि चोत्तरं मार्गं विचरति यस्मिन्नक्षत्रे स्थितस्तस्योत्तरभागेन यदि यादित तदाऽवनिपानां राज्ञां शुभकृतं श्रेयस्करः। प्रजानां लोकानां च हार्दिदस्तुष्टिदो भवति। तथा च पराशरः - **बृ.सं.,पृ-१४८**

अन्ये एवं व्याचक्षते- यथा भरण्यादिमघान्तमुत्तरो मार्गस्तत्र यदा विचरति तदावनिपानां शुभकृत् प्रजानां च हार्दिदः। तथा च गर्गः- **बृ.सं.,पृ-१४८**

# ५. बुधचाराध्यायः

**नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजो व्रजत्युदयम्।**

**जलदहनपवनभयकृद्धान्यार्घक्षयाविवृद्ध्यै वा।।१ ।।**

चन्द्रजो बुध उत्पातपरित्यक्त उत्पातविरहितो न कदाचिदपि न जात्वप्युदयं सन्दर्शनं व्रजति गच्छति। अपि तु यदा यदोद्गच्छति तदा तदा सोत्पातरूप एवेति। किमुत्पातं करोति। जलदहन-पवनभयकृत्। जलमुदकम्, दहनोऽग्निः, पवनो वायुः, एभ्यो भयं करोति। तथा धान्यार्घस्य क्षयाय भवति। विवृद्धयै विवृद्धये च भवति। बहुमूल्यता अर्घवृद्धिः स्वल्पमूल्यता अर्घक्षयः। तथा च समाससंहितायाम् - **बृ.सं.,पृ-१५०**

ननु जलदहनादिभिरुत्पातैः परित्यक्तश्चन्द्रजः कदाचिदप्युदयं नो गच्छति। किमेतेषां जलदहनादीनामन्यतम उत्पातसमेत उदयं करोति किं वा सर्वैरेव युक्त इत्यत्रोच्यते।
येनोत्पातेन सहास्तगस्तत्प्रतिलोमगश्चन्द्रज उदयं याति। अमुमेवार्थं वृद्धगर्ग आह-

अधुना नक्षत्रावस्थितस्य बुधस्य फलमाह-

**विचरञ्छ्रवणधनिष्ठाप्राजापत्येन्दुविश्वदैवानि।**

**मृद्नन् हिमकरतनयः करोत्यवृष्टिं सरोगभयाम्।।२ ।।**

अन्येषु नक्षत्रेष्वाह-

**रौद्रादीनि मघान्तान्युपश्रिते चन्द्रजे प्रजापीडा।**

**शस्त्रनिपातक्षुद्भयरोगानावृष्टिसन्तापैः।।३ ।।**

रौद्रामार्द्रा तदादीनि मघान्तानि पञ्च नक्षत्राणि। आर्द्रापुनर्वसुतिष्याश्लेषामघाश्चेति। चन्द्रजे उपाश्रिते व्यवस्थिते तानि चोपमृद्नन यदि विचरति तदा प्रजानां पीडा भवति। कैः शस्त्रनिपात-क्षुद्भयरोगानावृष्टिसन्तापैः। शस्त्रनिपातेन युद्धेन। क्षुद्भयेन दुर्भिक्षभीत्या। रोगैर्गदैः। अनावृष्ट्या अवर्षणेन। सन्तापेनोपतापेन च। तथा च कश्यपः- **बृ.सं.,पृ-१५१**

अन्येष्वाह-

**हस्तादीनि विचरन् षड्ऋक्षाण्युपपीडयन् गवामशुभः।**

**स्नेहरसार्घविवृद्धिं करोति चोर्वी प्रभूतान्नाम्।।४ ।।**

हस्तादीनि षड् नक्षत्राणि हस्तचित्रास्वातीविशाखानुराधाज्येष्ठा इति। एतानि षड्नक्षत्राणि विचरन् बुध एतेषु व्यवीस्थतस्तथोपपीडयन् योगतारकां भिन्दन् गवामशुभो भवति, गाः हन्ति। स्नेहानां तैलघृतानाम्। रसानां मधुरादीनामर्घवृद्धिं सामर्ध्यम्। तथोर्वीं भूमिं प्रभूतान्नां पर्याप्तसस्यां करोति। तथा च कश्यपः- **बृ.सं.,पृ-१५१**

अन्येष्वाह-

**आर्यम्णं हैतिभुजं भद्रपदामुत्तरां यमेशं च।**

**चन्द्रस्य सुतो निन्धन् प्राणश्रृतां धातुसंक्षयकृत्।।५।।**

आर्यम्णमुत्तरफल्गुनी। हौतभुजं कृत्तिकाः। हुतं भुक्त इति हुतभुगग्निस्तस्येदं हीतभुंजम्। भद्रपदा उत्तरा उत्तरभद्रपदा। यमेशं भरणी। चशब्दः समुच्चये। एतानि नक्षत्राणि चन्द्रस्य सुतो बुधो निध्नन्नुपमर्दयन् प्राणभृतां देहिनां धातूनां संक्षयं विनाशं करोति। वसासृङ्मांसमेदोऽ-स्थिमज्जाशुक्राणि धातव् इति। तथा च कश्यपः- **बृ.सं.,पृ-१५१**

अन्येष्वप्याह-

**आश्विनवारुणमूला न्युपमृद्नन् रेवतीं च चन्द्रसुतः।**

**पण्याभिषग्नौजीविकसलिलजतुरगोपघातकरः।।६।।**

आश्विनमश्विनी, वारुणं शतभिषक्, मूलम्। एतानि नक्षत्राणि तथा रेवती च चन्द्रसुतो बुधश्चरन् तथोपमृद्नन् पण्यजीविनां पण्यवृत्तीनां वणिक्प्रभृतीनाम्। भिषजां वैद्यानाम्, नौजीविकानां नाविकानाम्, सलिलजानां जलोत्पन्नानां द्रव्याणां मुक्तफलादीनाम् तुरगाणामश्वानामुपघातं करोति नाशकर्ता भवति। तथा च कश्यपः- **बृ.सं.,पृ-१५२**

अन्येष्वाह:

**पूर्वाद्युक्षत्रितयादेकमपीन्दोः सुतोऽभिमृद्नीयात्।**

**क्षुच्छस्त्रतस्करामयभयप्रदायी चरन् जगतः।।७।।**

पूर्वशब्द आदिर्यस्य तत्पूर्वाद्यृक्षत्रितयम्- पूर्वफल्गुनी, पूर्वाषाढा, पूर्वभद्रपदेति। अस्मान्नक्षत्रत्रि-तयादिन्दोः सूतो बुधश्वरन्नेकमभिमृद्नीयात् पीडयेत् तदा जगतो लोकस्य क्षुच्छस्त्रतस्करामय-भयप्रदायी भवति। क्षुद् दुर्भिक्षम् शस्त्रं संग्रामः तस्कराश्चौराः , आमयो रोगः। एभ्यो भयं भीतिं प्रददाति तच्छीलः। तथा च कश्यपः- **बृ.सं.,पृ-१५२**

अथ बुधस्य सप्मगतय उक्ताः पराशरतन्त्रे तासां च तन्मतेनैव नामान्याह-

**प्राकृतविमिश्रसंक्षिप्ततीक्ष्णयोगान्तधोरपापाख्याः।**

**सप्त पराशरतन्त्रे नक्षत्रैः कीर्तिता गतयः।।८।।**

प्राकृता, विमिश्रा, संक्षिप्ता, तीक्ष्णा, योगटान्तिका, घोरा, पापाख्या- एताः सप्तगमतयः पराशराख्ये तन्त्रे नक्षत्रैः कीर्तिता उक्ताः।

अथैतासां नक्षत्रवशेन नामान्याह-

**प्राकृतसंज्ञा वायव्ययाम्यपैतामहानि बहुलाश्च।**

**मिश्रा गति : प्रतिष्ठा शशिशिवपितृभुजगदैवानि।।९,१०,११।।**

**प्राकृतसंज्ञेति।** वायव्यं स्वाती, याम्यं भरणी, पैतामंह रोहिणी, बहुलाः कृत्तिकाश्चैतानि नक्षत्राणि प्राकृतसंज्ञा गतिः। एतेषां नक्षत्राणामन्यतमे स्थितो बुधः प्राकृतगत्या स्थितो भवति।

**मिश्रा गतिरित।** शशिदेवो मृगशिरः, शिवदेव आर्द्रा, पितृदेवो मघा, भुजगदेव आश्लेषा-एतानि नक्षत्राणि बुधस्य मिश्रा नाम्नी गतिः प्रदिष्टा उक्त।

**संक्षिप्तायामिति।** पुष्यः पुनर्वसुः, फल्गुनीद्वयं पूर्वफल्गुनी, उत्तरफल्गुनी एतानि नक्षत्राणि संक्षिप्तायां गतौ।

**तीक्ष्णायामिति।** भद्रपदाद्वयं पूर्वभद्रपदोत्तरभद्रपदे , शाक्रं ज्येष्ठा, अश्वयुगश्विनी, पौष्णं रेवती, तच्च सशाक्राश्वयुक् शाक्रेणाश्वयुजा च सह पौष्णमित्यर्थः। एतानि नक्षत्राणि तीक्ष्णायां गतौ।

**योगान्तिकेति।** मूलम्, द्वे आषाढे पूर्वाषाढोत्तराषाढे - एतानि नक्षत्राणि इन्दुसुतस्य बुधस्य योगान्तिका नाम्नी गतिः।

**घोरेति।** श्रवणम्, त्वाष्ट्रं चित्रा, वसुदेवं धनिष्ठा, वारुणं शतभिषग्- एतानि नक्षत्राणि घोरा नाम्नी गतिः।

**पापाख्येति।** सावित्रं हस्तः, मैत्रमनुराधा, इन्द्राग्निदैवतं विशाखा- एतानि नक्षत्राणि पापा नाम्नी गतिः। इतिशब्दः प्रकाराय। तथा च पराशरः-

अस्थास्य गतयः सप्त च प्राकृता विमिश्रा संक्षिप्ता तीक्ष्णा घोरा पापा योगान्तिका च। तत्र प्राकृता याम्याग्नेयरोहणीवायव्यानि। मिश्रा सौम्यार्द्रा मघाश्लेषा च। संक्षिप्ता पुष्यार्यम्ण-भाग्यादित्यानि। तीक्ष्णा अजपादतश्वत्यादि ज्येष्ठा च। घोरा त्रीणि श्रवणादीनि त्वाष्ट्रं च। पापा सावित्रेन्द्रग्निमैत्राणि। योगान्तिका मूलमाषाढे।

अथ पराशरमतेनाऽऽसामेवोदयास्तलक्षणमाह-

**उदयप्रवासादिवसै : स एव गतिलक्षणं प्राह।।१२।।**

**चत्वारिंशत्४० त्रिंशद्३० द्विसमेता विशंति २२ द्विनवकं च १८।**

**नव ९ मासार्द्ध १४ दश चैकसंयुताः ११ प्राकृताद्यानम्।।१३।।**

स एव पराशरमुनिर्गतिलक्षणं प्राह- उदयदिवसैः प्रवासदिवसैः। उदयः सूर्यमण्ड-लान्निर्गमः। प्रवासस्तत्रैवास्तमयः। तैश्च दिवसैर्गतिलक्षणं प्राहोक्तवान्।

चत्वारिंशदिति। एतानि चत्वारिंशदादीनि प्राकृताद्यानां गतीनामुदये प्रवासे च प्रमाणम्। तद्यथा- प्राकृतायां गतौ बुधः स्थित उदेति तदा चत्वारिश ४० द्दिनान्युदित त्रिंशत् ३०। अथास्तमेति तदा चत्वारिशं ४० द्दिनान्यस्तमित एव तिष्ठति। एवं मिश्रायां त्रिंशत् ३०। संक्षिप्तायां द्विसमेता विंशतिर्द्वाविंशतिः २२। तीक्ष्णायां द्विनवकमष्टादश १८। योगान्तिक्यां नव ९। घोरायां पञ्चदशं १५। पापाख्यायां च दश चैकसंयुता एकादश ११ दिनानीति। यद्यपि गणितवासनयैतन्नोपपद्यते तथापि पराशरमङ्गीकृत्याऽऽचार्येणोक्तम्। पराशरः- **बृ.सं.,पृ-१५५**

अथ चत्वारिशत्त्रिंशद्द्विंशत्यष्टादशपञ्चदशैकादशनवरात्राणि गतिक्रमादुदितोऽभिदुश्यते तान्ये-वास्तमितो भवति। उष्णशीतवाय्वभ्रसूर्येन्दुग्रहणायोदयति सस्यविद्याताय चे ति। न केवलं पराशरेणोक्त यावद् गर्गादिभिरपि। तथा च **वृद्धगर्गः**-

**प्राकृतगत्यामारोग्यर्वर्षिटसस्यमप्रवृद्धयः क्षेमम्।**

**संक्षिप्तमिश्रयोर्भिश्रमेतदन्यासु विपरीतम्।।१४।।**

प्राकृतगत्यां स्थिते बुधे आरोम्यं नीरोगिता, वृष्टिर्वर्षणम्, प्रकृष्टा अभिप्रभूता सस्यानां वृद्धिरेतानि भवन्ति , तथा लोके क्षमं च भवति। संक्षिप्तमिश्रयोर्द्वयोर्गत्योरेतदेव पूर्वोक्तं फलं मिश्रम्। आरोग्यवृष्टिसस्यप्रवृद्धयः क्षेमं च मध्यं भवति। अन्यासु परिशेषासु तीक्ष्णयोगान्तघोरपापाख्याम् विपरीतम्। अनाोरग्यमनावृष्टिः सस्यानामवृद्धिरक्षेममिति। तथा च पराशरः- **बृ.सं.,पृ-१५६**

तासां प्रथमा गतिः क्षेमारोग्याम्बुसस्यवती। इतरे द्वे व्यामिश्रफले। शेषाश्चतस्त्रो दुर्भिक्षा क्षेमाय। विशेषतस्तु सौम्यादिषड्नक्षत्रचारी सुवृष्टये। श्रविष्ठावारुणयोश्च। दक्षिणतो नैऋतेन्द्रपूर्वासु भयकृत। अश्विन्यां वणिग्विनाशाय। त्वाष्ट्रे शरत्सस्यानाम्। रोहिणीश्रवणाग्नेयब्रह्म राशिष्वम्भोदविनाशः। हस्तोदितो मैत्रमनुचरन् पशुगोकोशलानभिहन्ति। विशाखामध्यगश्च सस्यमि ति। तथा च गर्गः - **बृ.सं.,पृ-१५६**

अधुना देवलमतेन बुधस्य गतिचतुष्टयमाह-

**ऋज्व्यतिवक्रा वक्रा विकला च मतेन देवलस्यैताः।**

**पञ्चचतुर्द्वयेकाहा ऋज्व्यादीनां षडश्यस्ता ः।।१५।।**

**ऋज्वीहिता प्रजानामतिवकार्थं गतिर्विनाशयति।**

**शस्त्रभयदा च वक्रा भयरोगसञ्जननी।।१६।।**

ऋज्वी गतिः प्रजानां हिता शुभकरी। अतिवक्रा गतिरर्धं विनाशयति दुर्भिक्षं करोति। वक्रा शस्त्रभयदा शस्त्रभयं संग्रामभीतिं करोति। विकला भयं भीतिं रोगान् गदांश्च सञ्जनयत्युत्पाद्यति। तथा च देवलः – **बृ.सं.,पृ-१५६**

अथोदयास्तमययोः शुभाशुभलक्षणमाह-

**पौषाषाढश्रावणवैशाखोष्विन्दुजः समाघेषु।**

**दृष्टौ भयाय जगतः शुभफलकृत् प्रोषितस्तेषु।।१७।।**

**कार्त्तिकेऽश्वयुजि वा यदि मासे दृश्यते तनुभवः शिशिरांशाो :।**

**शस्त्रचौरहुतभुग्गदतोयक्षुद्भयानि च तदा विदघाति।।१८।।**

**रुद्वानि सौम्येऽस्तमिते पुराणि यान्युद्गते तान्युपयांति मोक्षम्।**

**अन्ये तु पश्चादुदिते वदन्ति लाभः पुराणां भवतीति तज्ज्ञाः।।१९।।**

**हेमकान्तिरथवा शुकवर्णः सस्यकेन मणिना सदृशो वा।**

**स्निग्धमूर्त्तिरलघुश्च हिताय व्यत्यये न शुभकृच्छशिपुत्रः।।२०।।**

हेमकान्तिः सुवर्णाभः, अथवा शुकवर्णः शुककान्तिर्नीलपीतवर्ण इत्यर्थः। सस्यकेन मणिना नीलवर्णेन सदृशस्तुल्यो वा। तथा स्निग्धमूर्तिर्निर्मलदेहः। अलघुश्च विस्तीर्णबिम्बः। एवंविधः शशिपुत्रो बुधो लोकानां हिताय श्रेयसे भवति। व्यत्यये उक्तविपर्यये न शुभकृन्न शुभकरः। तथा च पराशरः- "विमलजलरजतस्फटिकाभः प्रशस्यते इति।

# ६. बृहस्पतिचाराध्यायः

महकार्तिकादीनां षष्ट्यब्दवर्षाणां संज्ञा ज्ञापनार्थमहा-

**नक्षत्रेण सहोदयमुपगच्छति येन देवपतिमन्त्री।**

**तत्सग्ज्ञं वक्तव्यं वर्षमासक्रमेणैव।।१।।**

येन नक्षत्रेण सहोदयं याति सुरमन्त्री गुरुर्यस्मिन्नक्षत्रे स्थितः सूर्यमण्डलादुदयं दर्शनं याति तन्नक्षत्रं गुरुसहितम्। अथवा येन नक्षत्रेण सहास्तं याति यस्मिन्नक्षत्रे स्थितः सूर्यमण्डले प्रविशति तत्संज्ञं तन्नामधेयं वर्षं वक्तव्यं लोके वाच्यम्। तच्च मासक्रमेण मासपरिपाट्या। अनन्तरोक्तस्यार्थस्य नक्षत्रेण सहोदयमस्तं चेत्यस्य सन्देहव्युदासार्थमाहमासक्रमेणैव। अन्यमासनक्षत्रेण सहास्तं गणोऽन्यमासनक्षत्रेण सहोदितः। यथा रोहिणीस्थोऽस्तं गतो मृगशिरः स्थश्चोदयं गतस्तदा-नन्तराराक्रान्तमाससंज्ञितक्रमेण वर्षं बोद्धव्यमिति। ऋषिपुत्रादिभिरुदयनक्षत्रमाससंज्ञितक्रमेण वर्ष वक्तव्यमित्युक्तम्। तथा च ऋषिपुत्र आह-

प्रभवादीनामब्दानां प्रवृत्तिर्गुरोरुदयकालादित एव। यतो गुरुरत्राबधितत्वेन स्थितः।

केचित् कृत्तिकादियुक्ते गुरौ यच्चन्द्रयुक्तं नक्षत्रं चैत्रमासादितो भवति, ततो महाकार्तिकादीनि संवत्सराणि प्रभवादीनि च गणयन्ति। अपरे सौरमानने गणयन्ति। तदयुक्तत्। यस्मात् सौरं मानमधिकं गुरुमानात्। यदुत्कृष्टं मानं तत्स्वल्पतरमानेनानुमीयानं बहुतरं भवति। यथा - अष्टयवेनाङ्गुलेन ये पादोना एकाशीतिहस्तास्त एवं सप्तयवेनानुमीयमाना हस्तशतं भवन्ति। एवं सौरं मानं गुरुमानाच्चतुर्यगेण न्यूनं भवति। आचार्य-ऽऽर्यभटेन च प्रदर्शितम्।

राशिगुणा इति। भगणे द्वादश राशयो भवन्ति तैर्गुणा द्वादशगुणा इत्यर्थः। द्वादशगुणा गुरोरब्दाः। वस्वष्टरसाम्बराद्रिगुणवेदतुल्याः ४३७०६८८। रविभगणा एव रव्यब्दाः। खचतुष्टयर-दवेतुल्याः ४३२००००। गुरोरब्दानां रव्यब्दानां चान्तरे कृते गुरोरब्दाः समधिका जाता वस्वष्टर्तुखेषवः ५०६८८। अत्र च त्रैराशिकम् — यदि चतुर्युगरव्यब्दानामनन्तर-प्रदर्शितगुरुरव्यब्दान्तरं लभ्यते तदैवस्य रव्यब्दस्य कियदित। न्यासः - ४३२००००। ५०६८८। १। फलं रविवर्षभागे इति। रव्यब्दानां कृतखगुणयमै २३०४ रपवर्तितानां शरागाष्टेन्दवो लभ्यन्ते १८७५। तावद्भागेन रविगुरुवर्षान्तरस्य द्व्यदिका विंशतिर्भवति २२। सप्तत्यधिकेऽब्दशते एकादशभागैः पञ्चभिरधिके १७०/४/११ गते गुरुयुक्तनक्षत्र-माससंज्ञवर्षद्वयमधिकं भवति। तथा च गर्ग आह- **बृ.सं.,पृ-१६१**

लग्नत्रिकोणेषु गुरुस्त्रिभागैर्विकल्प्य वर्षाणि वयोऽनुमानात् इत्यनेन गणितेन यान्यतीत-वर्षाण्यागतानि तानि द्व्यधिकया विंशत्या २२ गुणयित्वा पादोनैरेकोनविंशतिशतै-१८७५ र्विभज्य लब्धम-नन्तरोक्तश्लोकानीतगुर्वतीतजन्मवर्षाणां विशोध्य शेषं स्फुटतरमतीत-जन्मवर्षपिण्डं भवतीति। अत्र गुणकारभागहारयोराचार्येण द्विगुणतोपनिबद्धा। यत आचार्य-प्रणीतकालेऽतीतं षष्टयब्दादेर्वर्षद्वयं त्रयो मासाश्चतुर्दश दिनानि दिनशेषं खद्विदश १०२०। अक्षागाष्टरुपाणि १८७५ छेदः। तत्परिणामायं छेदं तेन वर्षद्वयेन सङ्गुण्य ततो मासत्रयं दिनीकृत्य सदिनं कृत्वा तेन छेदेन सङ्गुण्य शेषं युक्तं कृत्वा खर्त्वग्निभिछेदे संयोज्यते। तस्य च सविकलत्वात् सवर्णनाय द्वाभ्यां गुणना क्रियते। स्वाधःस्थं रूपार्द्धं योज्यते। ततः सवर्णीकृतो भवति। एवं क्षेपस्य द्विगुणत्वाद् गुणकारभागहारावप्याचार्येण द्विगुणावुपनिबद्धाविति। तदर्थं चतुश्चत्वारिंशद् गुणकारः। शुन्यशरागरामा ३७५० भागहार इति।

यदुक्तं वर्षं मासक्रमेणैव तत् कथमित्यत आह-

**वर्षाणि कार्तिकादीन्याग्रेयाद्भद्वयानुयोगीनि।**

**कमशस्त्रिभं तु पञ्चममुपान्त्यमन्त्यं च यद्वर्षम्।।२।।**

एवमत्रान्त्यशब्देन समीपं दशमं वर्षं श्रावणमन्त्येनाऽऽश्वयुजमिति न शोभनम्। अत्र केचिदृषि-पुत्रस्य मतभेदं मन्यन्ते –

स्वमतेनैतद्विरुध्यते। यदि त्रिनक्षत्रो मार्गशीर्षस्तदा माघस्त्वेकनक्षत्रो भवति द्विनक्षत्राः स्मृताः शेषाः इत्यनने सह विरुद्धयते। यस्मात् त्रयस्त्रिनक्षत्राः शेषा द्विनक्षत्राः स्मृतास्त्वेनक्षत्रो नास्त्येव। तस्मात् पुस्तकपाठेऽयं सिद्धान्तपाठः कथ्यते।

तस्मात् क्रमशस्त्रिभं तु पञ्चममुपान्त्यमन्त्यं च यद्वर्षम् इत्यत्र पञ्चमैकादशदशस्त्रि-नक्षत्रांश्चेति शोभनम्।

अथैतेषां कार्तिकादीनां वर्षाणा फलानि विवक्षुरादौ कार्तिक आह-

**शकटानलोपजीवकगोपीडा व्याधिशस्त्रकोपश्च।**

**वृद्धिस्तु रक्तपीतककुसुमानां कार्तिके वर्षे।।३।।**

कार्तिके वर्षे शकटोपजीविनां शकटेन गन्त्र्या य उपजीवन्ति तेषाम्। तथा अनलोपजीविनां सुवर्णकारलोहकारयस्कारादीनाम्। गवां च पीडा भवति। तथा व्याधयो रागाः शस्त्रकोपश्च युद्धानि भवन्ति। तथा रक्तपीतककुसुमानां द्रव्याणां रक्तं पीतं च पुष्पं येषां सम्भवति तेषां च वृद्धिर्भवति। तथा च

अथ मार्गशीर्ष आह-

**सौम्येऽब्देऽनावृष्टिर्मृगाखुशलभाण्डजैश्च सस्यवधः।**

**व्याधिभयं मित्रैरपि भूपानां जायते वैरम्।।४।।**

सौम्ये मार्गशीर्षेऽब्दे अनावृष्टिर्भवति। मृगा अरण्यपशवः आखवो मूषकाः शलभाः प्राणिनः कीटजातयः, अण्डजाः पक्षिणः- एतैः सस्यानां वधो नाशो भवति। तथा व्याधिभयं रोगभीतिः। भूपानां राज्ञां मित्रैरपि सुहृद्भिरपि वैरमप्रीतिर्जायते उत्पद्यते। किं पुनः शत्रुभिः सह न भवेदिति। तथा च गर्गः-

**बृ.सं.,पृ-१६३**

अथ पौष आह-

**शुभकृज्जगतः पौषो निवृत्तवैराः परस्परं क्षितिपाः।**

**द्वित्रिगुणो धान्यार्घः पौष्टिककर्मप्रसिद्धिश्च।।५।।**

पौषोऽब्दो जगतो लोकस्य शुभकृच्छुभमिष्टं करोति। क्षितिपा राजानः परस्यरमन्योन्यं निवृत्तवैरा विगतद्वेषां भवन्ति। धान्यस्यार्धो द्विगुणस्त्रिगुणो वा भवति। धान्यस्य यन्मूल्यमासीत्तेनैव द्विगुणं त्रिगुणां वा धान्यं लभ्यते। तथा पौष्टिककर्मणां पुष्टिदानां कार्याणां प्रसिद्धिर्भवति। अतिशयेन भवतीत्यर्थः। तथा च गर्गः- **बृ.सं.,पृ-१६३**

अथ माघ आह-

**पितृपूजापरिवृद्धिर्माघे हार्दिश्च सर्वभूतानाम्।**

**आरोग्यवृष्टिघान्यार्धसम्पदो मित्रलाभश्च।।६।।**

माघे पितृणां पूजापरिवृद्धिर्भवति। अत्यर्थं जनाः पितृपूजाकर्मणि रता भवन्तीत्यर्थः। मघायाः पितृदैवतत्वात् सर्वभूतानां च हार्दिश्चिततुष्टिर्भवति। तथा आरोग्यं नीरोगता, वृष्टिर्वर्षणम् धान्य-स्यार्धसम्पमर्धताः, एते भवन्ति। तथा मित्रलाभश्च भवति। यत्किञ्चिन्मित्रत्वमापद्यत इत्यर्थः। तथा च गर्गः- **बृ.सं.,पृ-१६५**

अथ फाल्गुन आह-

**फाल्गुनवर्षे विद्यात् क्वचित् क्वचित् क्षेमवृद्धिसस्यानि।**

**दौर्भाग्यं प्रमदानां प्रबलाश्चौरा नृपाश्चोग्राः।।७।।**

फाल्गुनवर्षे क्वचित्क्वचित्क्षेमवृष्टिसस्यानि विन्द्याज्जानीयात्। क्वचित्क्षेमं क्वचिद् वृष्टिः क्वचिच्चं सस्यं भवति न सर्वत्र। तथा प्रमदानां स्त्रीणां दौर्भाग्यं दुर्भाग्यत्वं तन्नृणामवाल्लभ्यं भवति। प्रबलाश्चौरास्तस्करा बहवो भवन्ति अ तथा नृपाश्च राजाना उग्राः क्रूरा भवन्ति। तथा च गर्गः- **बृ.सं.,पृ-१६५**

अथ चैत्र आह-

**चैत्रे मन्दवृष्टिः प्रियमन्नं क्षेममवनिपा मृदवः।**

**वृद्धिस्तु कोशघान्यस्य भवति पीडा च रूपवताम्।।८।।**

चैत्रेऽब्दे वृष्टिर्मन्दा अल्पा भवति। प्रियमन्नं सुदुर्लभमन्नं भवति। लोके क्षेमं लब्धपालनं तथा अवनिपा राजानो मृदवोऽक्रूरा भवन्ति। कोशध्यान्यस्य शिम्बिधान्यस्य मुद्गादेर्वृद्धिर्बाहुल्यम्। तथा रूपवतां सुरूपाणां पीडा भवति। चशब्दः समुच्चये। तथा च गर्गः- **बृ.सं.,पृ-१६५**

अथ वैशाख आह-

**वैशाखे घर्मपरा विगतभयाः प्रमुदिताः प्रजाः सनृपाः।**

**यज्ञक्रियाप्रवृत्तिर्निष्पत्तिः सर्वसस्यानाम्।।९।।**

वैशाखेऽब्दे सनृपाः प्रजा नृपेण राज्ञा सहिताः सर्वजनपदा धर्मरता धर्मसक्त विगतभया भयरहिताः प्रमुदिताः प्रहृष्टाश्च भवन्ति। तथा यज्ञक्रियाणां यागकर्मणां प्रवृतिः प्रवर्तनं भवति। सस्यानां सर्वेषां च निष्पत्तिरशेषाणां सस्यानां समृद्धिर्भवति। तथा च गर्गः- **बृ.सं.,पृ-१६६**

अथ ज्येष्ठ आह-

**ज्यैष्ठे जातिकुलघनश्रेणीश्रेष्ठा नृपाः सघर्मज्ञाः।**

**पीडयन्ते धान्यानि च हित्वा कंगुं शमीजातिम्।।१०।।**

ज्यैष्ठेऽब्दे जातिकुलधनश्रेणीश्रेष्ठा जातीनां ये श्रेष्ठाः प्रधानाः कुलश्रेष्ठाः सत्कुलजाः, धनश्रेष्ठा अतिधिनिनः, श्रेणीश्रेष्ठा बहूनां समानजातीयानां संज्ञा श्रेणी, ततः श्रेष्ठा प्रधानाः, नृपा राजानस्ते च सधर्मज्ञा धर्मज्ञैर्जनैः सहिताः, ते सर्व एव पीडयन्ते तथा धान्यानि च पीड्यन्ते सर्वाण्येव। किन्तु हित्वा कङ्गुशमीजातिम्। कङ्गु प्रियङ्गुः, शमीजातिस्तिलादिः, एतद्धित्वा वर्जयित्वा। केचित् सबीजानीति पठन्ति। तथा च गर्गः- **बृ.सं.,पृ-१६६**

अथाऽऽषाढ आह-

**आषाढे जायन्ते सस्यानि क्वचिदवृष्टिरन्यत्र।**

**योगक्षेमं मध्यं व्यग्राश्च भवन्ति भूपालाः।।११।।**

**श्रावणवर्षे क्षेमं सम्यक् सस्यानि पाकमुपयान्ति।**

**क्षुद्रा ये पाषण्डाः पीड्यन्ते ये च तद्भक्ताः।।१२।।**

श्रावणवर्षे क्षेमं भवति। तथा सर्वाणि सस्यानि सम्यग् निश्चितं पाकं निष्पत्तिमुपयान्ति। क्षुद्राणां पाखण्डाना भक्ताः सेवकास्ते पीड्यन्ते बाध्यन्ते। तथा च गर्गः - **बृ.सं.,पृ-१६६**

अथ भाद्रपद आह-

**भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्वस्यं च।**

**न भवत्यपरं सस्यं क्वचित् सुभिक्षं क्वचिच्च भयम्।।१३।।**

भाद्रपदेऽब्दे वल्लीजं मुद्गादिकं निष्पतिं परिपाकं याति प्राप्नोति। तथा च पूर्वं प्रथममुपगतं सस्यं निष्पत्तिं याति। अपरं पश्चादुप्तं सस्यं न भवति। क्वचित् सुभिक्षं क्वचिच्च भयं भीतिर्भवति। तथा च गर्गः- **बृ.सं.,पृ-१६७**

अथाऽऽश्वयुज आह-

**आश्वयुजेऽब्देऽजस्त्रं पतति जलं प्रमुदिताः प्रजाः क्षेमम्।**

**प्राणचयः प्राणभृतां सर्वेषामन्नबाहुल्यम्।।१४।।**

**उद्गारोग्यसुभिक्षक्षेमकरो वाक्पतिश्वरन् भानाम्।**

**याम्ये तद्विपरीतो मध्येन तु मध्यफलदायी।।१५।।**

**विचरन् भद्वपमिष्टस्तत्सार्धवत्सरेण मध्यफलः।**

**सस्यानां विध्वंसी विचरेदधिकं यदि कदाचित्।।१६।।**

वत्सरेण वर्षेण भद्वयं नक्षत्रद्वयं विचरन् गच्छन् गुरुरिष्टः शोभनः। एतदुक्तं भवति बृहस्पतिर्यदा वर्षेण नक्षत्रद्वयं भुङ्क्ते तदा स प्रजानां शुभकरो भवति। तत्सार्द्धे वत्सरेण मध्यफल इति। तन्नक्षद्वयं सार्द्धं यति वत्सरेण विचरति तदा मध्यफलो मध्यमं फलं करोति। न शुभं नाप्यशुभमित्यर्थः। सस्यानां विध्वंसीति। अधिकं भद्वयात सार्द्धद्यदि कदाचिद्विचरेद्वर्षेण तदा सस्यानां विध्वंसी भवति। सस्यानि विनाशयतीत्यर्थः। तथा च पराशरः – **बृ.सं.,पृ-१६८**

मध्यदक्षिणोत्तरमार्गप्रविचारी मध्यदारुणोतत्तमप्रजाभावकरः। श्वेतरक्तपीतकृष्णवर्णो ब्राह्मणादिवर्ण-जयाय। सपादमृक्षद्वयमब्देन प्रविचरन् सस्यसम्पत् करोति। विपर्ययाद्विपरीतः।

अथ गुरोर्वर्णलक्षणमाह-

**अनलभयमनलवर्णे व्याधिः पीते रणागमश्यामे।**

**हरिते च तस्करेभ्यः पीडा रक्ते तु शस्त्रभयम्।।१७।।**

**धूमाभेऽनावृष्टिसित्रदशगुरौ नृपवधो दिवा दृष्टे।**

**विपुलेऽमले सुतारे रात्रौ द्दष्टे प्रजाः स्वस्थाः।।१८।।**

**रोहिण्योऽनलभं च वस्तरतनुर्नाभिस्त्वषाढाद्वयं**

**सार्पे हृत्पितृदैवतं च कुसुमं शुद्धैः शुभं तैः फलम्।**

**देहे क्रूरनिपीडितेऽग्न्यनिलनं नाभ्यां भयं क्षुत्कृतं**

**पुष्ये मूलफलक्षयोऽथ हृदये सस्यस्य नाशो ध्रुवम्।।१९।।**

**गतानि वर्षाणि शकेन्द्रकालाद्धतानि रुद्रैर्गुणयेच्चतुर्भिः।**

**नवाष्टपञ्चाष्टयुतानि कृत्वा विभाजयेच्छून्यशरागरामैः।।२०।।**

**लब्धे युक्तं शकभूपकालं संशोध्य षष्टया विषयैर्विभज्यते।**

**युगानि नारायणपूर्वकाणि लब्धानि शेषाः क्रमशः समाः स्युः।।२१।।**

**एकैकमब्देषु नवाहतेषु दत्त्वा पृथग्द्वादशकं क्रमेण।**

**हृत्वा चतुर्भिर्वसुदेवताद्यान्युडूनि शेषांशकपूर्वमब्दम्।।२२।।**

**विष्णुः सुरेज्यो बलभिद्धुताशस्त्वष्टोत्तरप्रोष्ठपदाधिपश्च।**

**क्रमाद्युगेशाः पितृक्श्विसोमाः शकानला-ख्याश्विभगाः प्रदिष्टाः।।२३।।**

विष्णुर्नारायणः प्रथमयुगम्। सुरेज्यो बृहस्पतिर्द्वितीययुगम्। बलभिदिन्द्रस्तृतीयम्। हुताशोऽग्नि-श्चतुर्थम्। त्वष्टा नाम प्रजापतिः पश्चमम्। उत्तरप्रोष्ठपदाधिपोऽहिर्बुधन्यः षष्ठम्। पिता सप्तम्म। विश्वोऽष्टयम्। सोमो नवमम। शक्रानल इन्द्राग्निदर्शमम्। अश्विसंज्ञमेकादशम्। भगः सूर्यो द्वादशम्। एते देवविशेषा द्वादश क्रमादानुपूर्व्येण युगेशा युगस्वामिनः प्रदिष्टा उक्ताः। तथा च समाससंहितायाम् - **बृ.सं.,पृ-१७३**

विष्णुगुरुशक्रहुतभुक्त्वष्टाहिर्बुध्न्यपित्र्यविश्वानि।

सौम्यमथेन्द्रान्याख्यं त्वाश्विनमपि भाग्यसंज्ञं च।।

अत्र युगे युगे पञ्च वर्षाणि भवन्ति। तेषां नाम दैवतं च प्रत्येकस्याह-

**संवत्सरोऽग्निः परिवत्सरोऽर्क ईदादिकः शीतमयुखमाली।**

**प्रजापतिश्चाप्यनुवत्सरः स्याद्विद्वत्सरः शैलसुतापतिश्च।।२४।।**

**वृष्टिः समाद्ये प्रमुखे द्वितीये प्रभूततोया कथिता तृतीये।**

**पश्चाज्जलं मुञ्चति यच्चतुर्थं स्वल्पोदकं पञ्चममब्दमुक्तम्।।२५।।**

**चत्वारि मुख्यानि युगान्यथैषां विष्णिवन्द्रजीवानलदैवतानि।**

**चत्वारि मध्यानि च मध्यमानि चत्वारि चान्त्यान्यमानि विद्यात्।।२६।।**

एषां द्वादशानां युगानां मध्याच्चत्वारि युगानि मुख्यानि उत्तमफलानि प्रयच्छन्ति। अथशब्दः पादपूरणे चार्थे वा। कानि तानि ? विष्णुः। इन्द्रः। जीवो बृहस्पतिः। अनलोऽग्निः। विष्णुदेवतं प्रथमम्। इन्द्रदैवतं तृतीयम्। बृहस्पतिदैवतं द्वितीयम्। अग्निदैवतं चतुर्थम्। एतानि मुख्यानि। तथा चत्वारि युगानि मध्यानि मध्यमान्येव मध्यफलानि न शुभानि नाप्यशुभानि। काति च तानि ? त्वष्टृदैवतम्। अहिर्बुध्न्यदैवतम्। पितृदैवतम्। विश्वदैवतम्। एतानि मध्यफलानि। तथा चान्त्यानि चत्वारि। सोमदैवतम्। इन्द्राग्निदैवतम्। अश्विदैवतम्। भगाख्यदैवतम्। एतान्यधमानि दुष्टफलानि विन्द्याज्जानीयात्। तथा च समाससंहितायाम् - **बृ.सं.,पृ-१७४**

अधुना षष्टब्दपूर्वस्य प्रभवाख्यस्याब्दस्य प्रवृत्तिकालमाह-

**आद्यं धनिष्ठांशमभिप्रपन्नो माघे यदायात्युदयं सुरेज्यः।**

**षष्टयब्दपूर्वः प्रभवः स नाम्रा प्रवर्त्तते भूतविहतस्तदाबदः।।२७।।**

सुरेज्यो बृहस्पतिः। आद्यं प्रथमं धनिष्ठांश धनिष्ठायाः प्रथमपादमभिप्रपन्नस्तत्र स्थितो माघे मासे यदा यस्मिन् काले उदयं जाति सूर्यमण्डलादुद्गच्छति तदा तस्मिन् काले षष्टयब्दपूर्वं: षष्टब्दस्य प्रथमोऽब्दः। स च प्रभवो नाम्ना प्रभवसंज्ञः प्रपद्यते प्रवर्तते। तस्य प्रारम्भो भवतीत्यर्थः। एतच्चान्द्रेण मानेन यो मासस्तत्र सम्भवति न सौरमानेन। यतः कृतदृक्कर्मद्वयो गुरुर्यदा राशिनवका-द्भागत्रयो-विंशतेर्लिप्ताविंशतेश्वार्वाग्भवति, सूर्यश्च कीदृशोऽब्दः ? भूतहितो भूतानां सत्त्वानां हितोऽनुकूल इति।

तथा च स्वरूपमाह-

**क्वचित्त्ववृष्टिः पवनाग्निकोपः सन्तीलयः श्लेष्मकृताश्व रोगाः।**

**संवत्सरेऽस्मिन् प्रभवे प्रवृत्ते न दुःखमाप्रोति जनस्तथापि।।२८।।**

अस्मिन् प्रभवाख्ये संवत्सरे वर्षे प्रवृत्ते प्रतिपन्ने सति क्वचित्ववृष्टिरवर्षणं भवति न सर्वत्र। तथा पवनाग्निकोपः। पवनो वायुः। अग्निर्हुताशनः। वायुप्रक्रोपोऽग्निप्रकोपश्च क्वचिद् भवति। तथा ईतयोऽवितवृष्टयादय उपद्रवाः सन्ति भवन्ति। श्लेष्मकृताः कफोत्पन्नाश्च रोगा गदाश्च क्वचिद् भवन्ति। तथापि जनो लोको न दुःख कृच्छ्रमाप्नोति लभते।

अथान्येष्वब्देषु नामानि फलं चाह -

**तस्मानद्धितीयो विभवः प्रदिष्टः शुकस्तृतीयः परतः प्रमोदः।**

**प्रजापतिश्वेति यथोत्तराणि शस्तानि वर्षाणि फलानि चैषाम्।।२९।।**

**निष्पन्नशालीक्षुयवादिसस्यां भयैर्विमुक्तामुपशान्त वैराम्।**

**संह्ललोकां कलिदोषमुक्तां क्षत्रे तदा शास्ति च भूतधात्रीम्।।३०।।**

तस्मात् प्रभवाद् द्वितीयोऽब्दो विभवनामा प्रदिष्ट उक्त। तृतीय : शुक्लः। परतोऽनन्तरं चतुर्थः प्रमोदः। प्रजापतिः पञ्चश्चेति। इतिशब्दः प्रकाराय। एतानि वर्षाणि यथोत्तराणि उत्तरोतराणि। शस्तानि शुभानि। अथानन्तरमेषां वर्षाणां फलानि भवन्ति।

निष्पन्नेत्यादि। तदा तस्मिनं युगे क्षत्रं राजवर्गो भूतधात्रीं वसुन्धरामेवंविधां शास्ति पालयति। किम्भूताम् ? निष्पत्रा निष्ठाः प्राप्ताः शालय इक्षवो यवादयः सस्यानि च यस्यांताम्। आदिग्रहणाद् गोधूममसूरचण-कमुद्गमाषा गृह्यन्ते। तथा भयैर्दुखैर्विमुक्तां वर्जिताम्। उपशान्तवैरां नष्टद्वेषाम्। संहृष्टलोकां प्रहृष्टजनाम्। कलिदोषमुक्तां कलियेग ये दोषा अधर्मव्याधिदारिद्र्यशोककालमृत्युप्रभुत-यस्तैर्मुक्तां रहिताम्। अथाव कलिः कलहः। दोषा राष्ट्रोपतापाः।

अथ द्वितीययुगस्याह-

**आद्योऽङ्गिराः श्रीमुखभावसाह्लौयुवाथ धातेति युगे द्वितीये।**

**वर्षाणि पञ्चैव यक्षक्रमेण त्रीण्यत्र शस्तानि समे परे द्वे।।३१।।**

**त्रिष्वङ्गिराद्येषु निकामवर्षी देवो निरातङ्कभयाश्च लोकाः।**

**अब्दद्वयेडन्त्येऽपि समा सुवृष्टिः किन्त्वत्र रोगाः समरागमश्च।।३२।।**

**शाके युगे पूर्वमथेश्वराख्यं वर्ष द्वितीयं बहुधान्यमाहुः।**

**प्रमाथिनं विक्रममप्यतोऽन्यद्वर्षं च विद्याद्गुरुचारयोगात्।।३३।।**

आद्यं द्वितीयं च शुभे तु वर्षे कृतानुकारं कुरुतः प्रजानाम्।
पापः प्रमाथी वृष्टिविक्रमौ तु सुभिक्ष रोगभयप्रदौ च।।३४।।

श्रेष्ठं चतुर्थस्य युगस्य पूर्वे यच्चित्रभानुं कथयन्ति वर्षम्।
मध्यं द्वितीयं तु सुभानुसंज्ञं रोगप्रदं मृत्युकरं न तच्य।।३५।।

तारणं तदनु भूरिवारिदं सस्यवृद्धिमुदितं च पार्थिवम्।
पञ्चमं व्ययमुशन्ति शोभनं मन्मथप्रबल-मुत्सवाकुलम्।।३६।।

त्वाष्ट्रे युगे सर्वजिदाद्य उक्तः संवत्सरोऽन्यः खलु सर्वधारी।
तस्माद्विरोधी विकृतः खरश्च शस्तो द्वितीयोऽत्र भयाय शेषाः।।३७।।

नन्दनोऽथ विजयो जयस्तथा मन्मथोऽस्य परतश्च दुर्मुख्यः।
कान्तमत्र युग आदितस्त्रयं मन्मथः समफलोऽधमोऽपरः।।३८।।

हेमलम्ब इति सप्तमे युगे स्याद्विलम्बि परतो विकारि च।
शर्वरीति तदनु प्लवः स्मृतो वत्सरो गुरुवशेन पञ्चमः।।३९।।

ईतिप्राय प्रचुरपवना वृष्टिरब्दे तु पूर्वे मन्दं सस्यं न बहुसलिलं वत्सरेऽतो द्वितीये।
अत्युद्वेगः प्रचुरसलिलः स्यात्तृतीयश्चतुर्थो दुर्भिक्षाय प्लव इति ततः शोभनो भूरितोयः।।४०।।

वैश्वे युगे शोभकृदित्यथाद्यः संवत्सरोऽतः शुभकृद्द्वितीयः।
क्रोधी तृतीयः परतः क्रमेण विश्वावसुश्चेति पराभवश्च।।४१।।

पूर्वापरो प्रीतिकरो प्रजानामेषां तृतीयो बहुदोषदोऽब्दः।
अन्त्यो समौ किन्तु पराभवेऽग्निः शस्त्रामयार्त्तिर्द्विज- गोभयञ्च।।४२।।

वैश्वे युगे इति। अथानन्तरं वैश्वे अष्टमे युगे आद्यः प्रथमः संवत्सरोऽब्दः शोकहृदति। केचिच्छोककृदिति पठन्ति शोकं कृन्तति छिनत्तीति शोककृत्। यतोऽस्य शोभनं फलमाचार्यो वक्ष्यति-पूर्वापरौ प्रीतिकरौ प्रजानाम् इति। तस्माच्छोकहृदिति निःसन्देहः पाठः। अतोऽन्यो द्वितीयः शुभकृत्। तृतीयः क्रोधी। परतोऽनन्तरं क्रमेण विश्वावसुश्चेति चतुर्थः। इति शब्दः प्रकारे। पराभवश्च पञ्चमः।

आद्यः प्लवङ्गो नवमे युगेऽब्दः स्यात्कीलकोऽन्यः परतश्च सौम्यः।
साधारणो रोधकृदित्यथाब्दः शुभप्रदः कीलकसौम्यसंज्ञौ।।४३।।

**कष्टः प्लवङ्गे बहुशः प्रजानां साधारणेऽल्पं जलमीतयश्च।**

**यः पञ्चमो रोधकृदित्यथाब्दश्चित्रं जलं तत्र च सस्यसम्पत्।।४४।।**

**विक्रमः सकललोकनन्दनो राक्षसः क्षयकरोऽनलस्तथा।**

**ग्रीष्मधान्यजननोऽत्र राक्षसो वह्निकोपनरकप्रदोऽनलः।।४५,४६,४७।।**

इन्द्राग्निदैवमिति। दशमं युगमिन्द्राग्निदैवतं यतत्र तस्मिन्नद्यवर्षं प्रथमवर्षं परिधाविसंज्ञम्। प्रमादिनं द्वितीयम्। अतोऽस्मादन्यत्तृती विक्रमं स्याद् भवते। राक्षसं चतुर्थम्। अनलसंज्ञितं पञ्चमम्। चशब्दोऽत्रोभयत्र समुच्चये।

परिधाविनीति। परिधाविनि वर्षे मध्यदेशनाशो भवति। तत्रैव नृपहानी राज्ञो मरणम्। जलमुदकमल्पं स्तोकम्। अग्तिकोपो वह्निभयम्। प्रमादिसंज्ञे जनो लोकः। अलसः सालसो भवति। तथा डमरं कलहः सशस्त्रः। रक्तकपुष्पाणां येषां वृक्षणां लोके रक्तपुष्पं भवति, तथा रक्तकबीजानां च नाशो भवति।

विक्रम इति। विक्रमः सकललोकानां नन्दनोऽब्दः समस्तजनसमृद्विकरः। राक्षसः समस्तलोकानां क्षयकारो विनाशकरो भवति। अनलस्तेनैव प्रकारेण क्षयकर एव अत्रास्मिन् अग्निकोपं मरकं च ददाति।

अथैकादशस्य युगस्याह-

**एकादशे पिङ्गलकालयुक्तसिद्धार्थरौदाः खलु दुर्मतिश्च।**

**आद्ये तु वृष्टिर्महती सचौरा श्वासो हनुकम्प्युतश्च कासः।।४८।।**

**यत्कालयुक्तं तदनेकदोषं सिद्धार्थसंथे वहवो गुणाश्चा।**

**रौद्रोऽतिरौद्रः क्षयकृत्प्रदिष्टो यो दुर्मतिर्मध्यम-वृष्टिकृत्सः।।४९।।**

**भाग्ये युगे दुन्दुभिसंज्ञमाद्यं सस्यस्य वृद्धिं महतीं करोति।**

**उद्गारिसंज्ञं तदनु क्षयाय नरेश्वराणां विषमा च वृष्टिः।।५०।।**

**रक्ताक्षमब्दं कथितं तृतीयं यस्मिन् भयं दंष्ट्रिकृतं गदाश्च।**

**क्रोधं बहुक्रोधकरं चतुर्थं राष्ट्राणि शून्यीकुरुते विरोधैः।।५१।।**

भाग्ये युगे इति। भाम्यसंज्ञे द्वादशे युगे आद्यं प्रथमं वर्ष दुन्दुभिसंज्ञं तच्च महतीमतिबह्वीं सस्यवृद्धिं करोति। तदनु तत्पश्चात् द्वितीयमङ्गरसञ्ज्ञं तच्च नरेश्वराणां राज्ञां क्षयाय नाशाय भवति। वृष्टिश्च विषमां अतुला अतिचण्डा वा भवति।

तथा तृतीयमब्दं वर्षं रक्ताक्षंसंज्ञं कथितमुक्तम्। तमिसन्नब्दे दंष्ट्रिकृतं भयं भवति। दंष्ट्रिणः सूकरादयस्तत्कृतं भयं भवति। तथा गदा रोगाश्च विरोधैः कलहैः शून्यीकुरुते। अशून्यानि शून्यानि करोतीति शून्यीकुरुते। उद्वासयतीत्यर्थः।

अथ पञ्चमस्य वर्षस्य फलं षष्ट्यब्दलक्षणं मया संक्षेपतः कृतमित्येतच्चाह –

**क्षयमिति युगस्यान्त्यस्थान्त्यं बहुक्षयकारक जनयति भयं तद्विप्राणां कृषीवलवृद्धिदम्।**
**उपचयकरं विट्छूद्राणां परस्वहृतां तथा कथितमखिलं षष्ट्यब्दे यत्तदत्र समासतः।।५२।।**

इति तस्मिन् शास्त्रे यत्कथितमुक्तं तदत्रास्मिन् बहुस्पतिचारे सर्वं समासतः संक्षेपतः कथितमुक्तम्। तथा च समाससंहितायाम् – **बृ.सं.,पृ-१८३**

अथ बिम्बलक्षणमाह-

**अकलुषांशुजटिकलः पृथुमूर्तिः कुमुदकुन्दकुसुमस्फटिकाभः।**
**ग्रहहतो न यदि सत्पथवर्त्ती हितकरोऽमरगुरुर्मनुजानाम्।।५३।।**

एवंविधोऽमरगुरुर्बुहस्पतिर्मनुजानां मनुष्याणां हितकरः शिवप्रदः। कीदृशः ? अकलुषांशु-निर्मलरश्मिः। जटिलः समन्ततौ रश्मिभिर्व्याप्तः। पृथुमूर्तिर्विस्तीर्णदेहः। तथा कुमुदस्य कुमुदपुष्पस्य कुन्दकुम-सुमस्य स्फटिकस्य च मणेः सदृशी आभा कान्तिर्यस्य। अतिस्निग्धः श्वेतवर्ण इत्यर्थः। यदि च ग्रहहतो न भवति ग्रहयुद्धे अन्येन ग्रहेण विजितो न भवति। तथा सत्पथवतर्ती ग्रहनक्षत्राणामृत्तर-मार्गगोचराणामधिकृतश्चेति।।

## ७. शुक्रचाराध्यायः

नागगजैरावतवृषगोजरद्गवमृगाजदहनाख्याः।

अश्विन्याद्याः कैश्चित् त्रिभाः क्रमाद्वीथयः कथिताः।।१।।

<u>स्फुटार्थ चक्र</u>

| वीथियाँ | नाग | गज | ऐरावत | वृष | गौ | जरद्गव | मृग | अज | दहन |
|---|---|---|---|---|---|---|---|---|---|
| न | अश्विनी | रोहिणी | पुनर्वसु | मघा | हस्त | विशा. | मूल | श्रवण | पू.भा. |
| क्ष | भरणी | मृगशिरा | पुष्य | पू.फा. | चित्रा | अनुरा. | पू.षा. | धनिष्ठा | उ.भा. |
| त्र | कृत्तिका | आर्द्रा | आश्लेषा | उ.फा. | स्वाती | ज्येष्ठा | उ.षा. | शतभि. | रेवती |

नागवीथी प्रथमा। गजवीथी द्वितीया। ऐरावतवीथी तृतीया। वृषभवीथी चतुर्थी। गोवीथी पञ्चमी। जगद्गववीथी षष्ठी। मृगवीथी सप्तमी। अजवीथी अष्टमी। दहनवीथी नवमी। एता नव वीथयः कैश्चिदाचार्येर्दिवलप्रभृतिभिरश्विन्याद्यास्त्रिभास्त्रिभिर्भैर्नक्षत्रैः कथिता। अश्विनीभरणी-कृत्तिका नागवीथी। रोहिणीमृगशिरआर्द्रा गजवीथी। पुनर्वसुतिष्याश्लेषा ऐरावतवीथी। एवं क्रमेण त्रिभिस्त्रिभिर्नक्षत्रैरन्या अपि ज्ञेयाः। एताः क्रमात् परिपाट्या वीथयः कथिता उक्ताः। तथा च देवलः **बृ.सं.,पृ-१८४**

अथ स्वमतेन प्रविभागमाह- **बृ.सं.,पृ-१८५**

**नागास्तु पवनयाम्यानलानि पैतामहात्रिभातिस्त्र :।**

**गोवीध्यामश्विन्यः पौष्णं द्वे चापि भद्रपदे।।२।।**

**जारद्गव्यां श्रवणात् त्रिभं च मैत्राद्यम्।**

**हस्तविशाखात्वाष्ट्राण्यजेत्यषाढाद्वयं दहना।।३।।**

**तिस्त्रस्तिस्त्रस्तासां क्रमादुदङ्मध्ययाम्यमार्गस्थाः।**

**तासामप्युत्तरमध्यदक्षिणावस्थितैकैका।।४।।**

तासां नागाद्यानां नवानां वीथीनां क्रमात् परिपाटयां तिस्त्रस्तिस्त्रो वीथय उदङ्मध्य-याम्यमार्गस्थाः। उत्तरे मार्गे मध्ये मध्यमे याम्ये दक्षिणे च स्थिताः। तद्यथा – नागगजैरावत्य उत्तरामार्गस्थाः। वृषभगोजारद्गाव्यो मध्यममार्गस्थाः। मृगाजदहना दक्षिणामार्गस्था। तासामपि वीथीनामुत्तरमध्यम-दक्षिणमार्गस्थानामुत्तरमध्यदक्षिणेनैकैका स्थिता। तद्यथा – नागा

उत्तरोत्तरा। गजा उत्तरदक्षिणा। तथा वृषभां मध्योत्तरा। गोवीथी मध्यमध्या। जरद्गतववीथी। ऐरावती उत्तरदक्षिणा। तथा वृषभा मध्योत्तरा। गोवीथी मध्यमध्या। जरद्गववीथी मध्यदक्षणिा। तथा मृगा दक्षिणोत्तरा। अजा दक्षिणमध्या। दहना दक्षिणदक्षिणा इति। तथा च पराशरः - **बृ.सं.,पृ-१८६**

**वीथीमार्गानपरे कथयन्ति यथा स्थिता भमार्गस्य।**

**नक्षत्राणां तारा याम्योत्तरमध्यमास्तद्वत्।।५।।**

अपरे आचार्या भमार्गस्य नक्षत्रपथस्य यथास्थितान् येनैव प्रकारेण व्यवस्थितान् वीथीमार्गान तेनैव प्रकारेण कथयन्ति प्रवदन्ति। यतस्तद्वतैनैव प्रकारेण नक्षत्राणां तारा याम्योत्तरमध्यमाः स्थिताः। याम्यास्तारा दक्षिणो मार्गः। उत्तराः मार्गः। मध्यमा मध्यमो मार्गः। अथवा नक्षत्राद्दक्षिणभागस्थो ग्रहो दक्षिणमार्गगः। उत्तरामार्गस्थ उत्तरमार्गगः। मध्यममार्गस्थो मध्यममार्गगः। तथा च काश्यपः। **बृ.सं.,पृ-१८७**

पुनरपि मतान्तरमाह-

**उत्तरमार्गो याम्यादि निगदितो मध्यमस्तु भाग्याद्यः।**

**दक्षिणमार्गोऽषाढादि कैश्चिदेवं कृता मार्गा :।।६।।**

कैश्चिदाचार्यैरवमनेन प्रकारेण मार्गाः कृताः। ते च गर्गादयः। याम्या भरणी तदादिको नवनक्षत्रान्त उत्तरो मार्गो निगदित उक्तः। यथा- भरणीकृत्तिकारोहिणीमृगशिरआर्द्रापुनर्वसुतिष्याश्ले-षामघा उत्तरो मार्गः। मध्यमस्तु भाग्याद्यः। भाग्यं पूर्वफल्गुनी तदादिको नवनक्षत्रान्तो मध्यमो मार्गः। तद्यथा– पूर्वफल्गुन्युत्तर-फल्गुनीहस्तचित्रास्वातीविशाखानुराधाज्येष्ठामूलमिति मध्यमो मार्गः। दक्षिण-मार्गोऽषाढादि। अषाढा पूर्वाषाढा तदादिको ननवक्षत्रान्तो दक्षिणमार्गः। तद्यथा - पूर्वाषाढोत्तराषाढा श्रवणा धनिष्ठा शतभिषक्पूर्व-भद्रपदोत्तरभद्रपदा रेवती अश्विनी दक्षिणो मार्ग इति। तथा च गर्गः। **बृ.सं.,पृ-१८८**

ननु संग्रहकर्त्रा यत्सारं तदेव वक्तव्य किं मतान्तरैः प्रयोजनमित्येदाशङ्क्याऽऽह-

**ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम्।**

**स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये।।७।।**

**उत्तरवीथिषु शुक्रः सुभिक्षशिवकृद्गतोऽस्तमुदयं वा।**

**मध्यासु मध्यफलदः कष्टफलो दक्षिणस्थासु।।८।।**

शुक्र उत्तरवीथीषु नागगजैरावताख्यासु स्थितो यद्यर्कमण्डले अस्तमयं गतस्तस्मादेवोदयं वा गतस्तदा सुभिक्षशिवकृत्। सुभिक्षं श्रेयश्च करोति। एवं मध्यासु मध्यमासु वीथिषु ऋषभगोजारद्ग-वाख्यासु मध्यमफलदः। न शुभं नाप्यशुभं फलं करोति। तथा च दक्षिणस्थासु वीथिषु मृगाजदहनाख्यासु कष्टफलोऽनिष्टफल इति। गर्गः- **बृ.सं.,पृ-१८९**

**अत्युत्तमोत्तमोनं समयध्यन्यूनमकष्टफलम्।**

**कष्टतमं सौम्याद्यासु वीथिषु यथाक्रमं ब्रूयात्।।९।।**

सौम्याद्यासु उदगाशाद्यासु वीथिषु नागाद्यासु नवसु यथाक्रमं परिपाटयाऽनेन प्रकारेण फलमिदं ब्रूयाद्वदेत्। तद्यथा – नगायामत्युतममतिशुभं फलम्। गजाव्यायां वीथ्यामुत्तमं शुभफलं किञ्चिदूतं पूर्वापेक्षया। एवमूनं किञ्चिच्छुभफलमैरावत्याम्। समं मध्यमं फलमृषभवीथ्याम्। मध्यममेव गोवीथ्याम्। न्यूनमीषदशशुभं जारद्गव्याम्। अधममनिष्टं मृगवीथ्याम्। कष्टमशुभमजवीथ्याम्। कष्टतरमतिकष्टं दहनवीथ्याम्।

अथ शुक्रस्य षण्मण्डलानि भवन्ति। तेषां लक्षणं सफलमाह-

**भरणीपूर्व मण्डलमृक्षचतुष्कं सुभिक्षकरमाद्यम्।**

**वङ्गाङ्गमहिषवाह्लिककलिङ्गदेशेषु भयजननम्।।१०।।**

**अत्रोदितमारोहेद्ग्रहोऽपरो यदि सितं ततो हन्यात्।**

**भद्राश्वशूरसेनकयौधेयकोटिवर्षनृपान्।।११।।**

**अन्येनात्राकान्ते म्लेच्छाटविकाश्वजीविगोमन्तान्।**

**गोनर्दनीचशूद्रान वैदेहांश्चानयः स्पृशति।।१२, १३।।**

अत्रास्मिन् मण्डले अन्येन परेण ग्रहेणाऽऽक्रान्ते रुद्धे शुक्रे म्लेच्छा जनाः।आटविका अरण्यवासिनः। श्वजीविनश्च श्वभिर्ये जीवन्ति। गोमन्तो विद्यमानगावः। गोनर्दा जनाः। नीचा अधमकर्मकराः। शूद्राः। वैदेहा जनाः। एतान् सर्वाननयः स्पृशति। सोप्रदवा भवन्तीत्यर्थः।

अथ तृतीयं मण्डलं सफलमाह-

**विचरन् मघादिपञ्चकमुदितः सस्यप्रणाशकृच्छुकः।**

**क्षुत्तस्करभयजननो नीचोन्नतिसङ्करकरश्च।।१४।।**

**पित्र्याद्येऽवष्टब्धो हन्त्यन्ये नाविकाञ्छबरशूद्रान।**

**पुण्ड्रापरान्त्यशूलिकवनवासिद्रविडसामुद्रान।।१५।।**

**स्वात्याद्यं क्षत्रितयं मण्डलतेच्चतुर्थमभयकरम्।**

**ब्रह्मक्षत्रसुभिक्षाभिवृद्धये मित्रभेदाय।।१६।।**

**अत्राक्रान्ते मृत्युः किरातभर्तुः पिनष्टि चेक्ष्वाकून्।**

**प्रत्यन्तावन्तिपुलिन्दतङ्गणाञ्छूरसेनांश्च।।१७।।**

**ज्येष्ठाद्यं पञ्चर्क्षे क्षुत्तस्कररोगाः प्रबाधन्ते।**

**काश्मीराश्मकमत्सान् सचारुदेवीनवन्तश्चि।।१८।।**

**आरोहऽत्राभीरान् द्रविडाम्बष्ठत्रिगर्तसौराष्ट्रान्।**

**नाशयति सिन्धुसौवीराकांश्च काशीश्वरस्य वधः।।१९।।**

अत्रास्मिन् मण्डले यद्यपरो ग्रहः सितं शुक्रमारोहेत् तदा द्रविडान जनान्। आभीरान्। अम्बष्ठान्। त्रिगर्तान सौराष्ट्रान्। एतान्नाशयति क्षयं नयति। तथा सिन्धुसौवीरकांश्च जनान् नाशयत्येव। काशीश्वरस्य काशिाजस्य च वधो मरणं भवति।

अथ षष्ठं मण्डलं सफलमाह-

**अत्रारोहे शूलिकगान्धारावन्तयः प्रपीडयन्ते।**

**वैदेहवघः प्रत्यन्तयवनशकदासपरिवृद्धिः।।२०, २१।।**

धनिष्ठाद्यं धनिष्ठापूर्वकं षण्नक्षत्रम्–धनिष्ठा, शतभिषक् , पूर्वभद्रपदोत्तरभद्रपदा, रेवती, अश्वि-नीति। एतत् षष्ठं मण्डलम्। तच्च शुभं शुभफलप्रदम्। भूरिधनगोकुलाकुलम्। भूरि बहुलम्। धनं वित्तम् गोकुलानि गोवाटाः। एतैराकुलं सोद्यमं व्याप्तम्। अनल्पधान्यं प्रभूतशालिसंयुक्तम्। क्वचित् क्वचिच्च सभयं भीतिसंयुक्तं न सर्वत्र।

अत्रास्मिन् मण्डले यद्यपरो ग्रहः सितं शुक्रमारोहेत्तदा शूलिकाः। गान्धाराः। अवन्तयः। एते जनाः प्रपीड्यन्ते। तथा वैदेहानां जनानां वधो मरणम्। प्रत्यन्ता गह्वरवासिनः। यवनाः। शकाः। दासाः कर्मकराः। एतेषां परिवृद्धिर्भवति।

अथैषां मण्डलानां विशेषफलमाह-

**अपरस्यां स्वात्याद्यं ज्येष्ठादं चापि मण्डलं शुभदम्।**

**पित्र्याद्यं पूर्वस्यां शेषाणि योथक्तः फलदानि।।२२।।**

षष्ठे बालगर्भान् बालान् शूद्रांश्च हिनस्ति। यद्यारोहेत तदा काम्बोजैः सैन्धवो नृपतिः पराजयते आवन्त्याश्मकाधिपती चोपसृज्येते। अत्र मतभेदो वराहमिहिरेण सहास्ति। तथा च समाससंहितायाम् – **बृ.सं.,पृ-१९४**

अथ दिवादृष्टस्य शुक्रस्य विशेषफलमाह-

**दृष्टोऽनस्तगतेऽर्के भयकृत् क्षुद्ररोगकृत् समस्तमहः।**

**अर्धदिवसं च सेन्दुर्नृपबलपुरभेदकृच्छुक्रः।।२३।।**

शुक्रो भार्गवोऽनस्तमिते नास्तमितेऽर्के सूर्ये दृष्टोऽवलोकितो भयकृद् भयं करोति। तथा समस्तमहः सकलं दिनं दृष्टः क्षुद्रोगकृत्। क्षुद् दुर्भिक्षम्। रोगान् गदांश्च करोति। तथा अर्द्धदिवसे मध्याह्नसमये सेन्दुः सचन्द्रः शुक्रो दृष्टो नृपबलपुरभेदकृद् भवति। नृपस्य राज्ञो बलस्य सेनायाः परस्य नगरस्य भेदं पृथग्भावं करोति। तथा च पराशरः- **बृ.सं.,पृ-१९४**

अथ शुक्रस्य नक्षत्राणां भेदनाम् फलमाह-

**भिन्दन् गतोऽनलर्क्षं कूलातिकान्तवारिवाहाभिः।**

**अव्यक्ततुङ्गनिम्ना समा सरिद्भिर्भवति धात्री।।२४।।**

**प्राजापत्ये शकटे भिन्ने कृत्वेव पातक वसुधा।**

**केशास्थिशकलबला कापालमिव व्रतं धत्ते।।२५।।**

एवं रोहिण्याः शकटे शुक्रेण भिन्ने वसुधाः भूः पातकं ब्रह्महत्यामिव कृत्वा केशैर्मूर्द्धजैरस्थि-शकलैस्थिखण्डैः शबला मिश्रितशुक्लकृष्णा भवति। अतः कापालं व्रतमिव धत्ते धारयति। ब्रह्महत्यायाः कापालं व्रतं प्रायश्चित्तम्। कापालिकश्च केशास्थिशकलैः शबलो भवति।

अथ मृगशिरआर्द्रयोराह-

**सौम्योपगतो रससस्यसङ्क्षयोशना समुद्दिष्टः।**

**आर्द्रागतस्तु कोशलकलिङ्गहा सलिलनिकरकरः।।२६।।**

**अश्मकवैदर्भाणां पुनर्वसुस्थे सिते महाननयः।**

**पुष्ये पुष्टा वृष्टिर्विद्याधरगणविमर्दश्च।।२७।।**

**आश्लेषासु भुजङ्गमदारुणपीडावहश्वरञ्छुकः।**

**भिन्दन् मघां महामात्रदोषकृद्भूरिवृष्टिकरः।।२८।।**

**भाग्ये शबरपुलिन्दप्रध्वंसकरोऽम्बुनि वहमोक्षाय।**

**आर्यम्णे कुरुजाङ्गलपाञ्चालघ्नः सलिलदायी।।२९।।**

**कौरवचित्रकरणां हस्ते पीडाजलस्य च निरोधः।**

**कूपकृदण्डजपीडा चित्रास्थे शोभना वृष्टिः।।३०।।**

हस्ते स्थिते शुक्रे कौरवा जनाः। चित्रकराश्चित्रज्ञाः शिल्पिनः। एषां पीडा भवति जलस्योदकस्य च निरोधोऽवर्षणम्। चित्रास्थे शुक्रे कूपकृतां कूपकराणां खे अण्डजानां पक्षिणां च पीडा भवति। वृष्टिश्च शोभना कालोपयोग्या भवति।

अथ स्वातिविशाखयोराह-

**स्वातौ प्रभूतवृष्टिर्दूतवणिगं नाविकान् स्पृशत्यनयः।**

**ऐन्द्रग्रेऽपि सुवृष्टिर्वणिजां च भयं विजानीतता्।।३१।।**

**मैत्रे क्षत्रविरोधो ज्येष्ठायां क्षत्रमुख्यसन्तापः।**

**मौलिकभिषजांमूले त्रिष्वपि चैतेष्वनावृष्टिः।।३२।।**

**आप्येसलिलजपीडा विश्वेशे व्याघयः प्रकुप्यन्तिा।**

**श्रवणे श्रवणव्याधिः पाषण्डिभयं घनिष्ठासु।।३३।।**

**शतभिषजि शौण्डिकानामजैकपे द्यूतजीविनां पीडा।**

**कुरुपाञ्चालानामपि करोति चास्मिन् सलिलम्।।३४।।**

**अहिर्बुध्न्ये फलमूलतापकृद्यायिनां च रेवत्याम्।**

**अश्विन्यां हयपानां याम्ये तु किरातयवनानाम्।।३५।।**

आहिर्बुध्न्ये उत्तरभद्रपदायां फलानां मूलानां च तापकृत् पीडाकरः। रेवत्यां यायिनां पथिकानां च पीडाकरः। अश्विन्यां हयपानामश्वपतीनां तापकृत्। याम्ये भरण्यां किरातानां यवनानां जनानां च तापकृत् तापकरः। तथा च काश्यपः - **बृ.सं.,पृ-१९८**

**चतुर्दशे पञ्चदशे तथाष्टमे तमिस्त्रपक्षस्य तिथौ भृगोः सुतः।**

**यदा व्रजेद्दर्शनमस्तमेति वा तदा मही वारिमयीव लक्ष्यते।।३६।।**

भृगोः सुतः शुक्रस्यमिस्त्रपक्षस्य कृष्णपक्षस्य चतुर्दशीं तिथिं पञ्चदशीममावस्याष्टमीं वा समाश्रित्य यदा दर्शनमुदयं व्रजेत् सूर्यमण्डलादुद्गच्छति, अथवा अस्तमयमेति तत्रैवादर्शनमायाति तदा महीं भूः, वारिमयीव जलमयीव लक्ष्यते दृश्यते। अतिवृष्टिर्भवतीत्यर्थः। तथा च काश्यपः- **बृ.सं.,पृ-९९**

अथ गुरुशुक्रयोरन्योन्यं सप्तमस्थयोः फलमाह-

**गुरुर्भृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौ यदा।**

**तदा प्रजा रुग्भशोकपीडिता न वारि पश्यन्ति पुरन्दरोज्झितम्।।३७।।**

गुरुर्जीवः। भृगुः शुक्रः। एतावपरपूर्वकाष्ठयोः। अपरा पश्चिमा। पूर्वा प्राची। काष्ठा दिक्। पश्चिमपूर्व-योर्दिशोः परस्परन्योन्यं यदि च सप्तमराशिगौ भवतः। कदाचित् पूर्वकाष्ठागतः शुक्रोऽपरकाष्ठागतो गुरुः। कदाचित् पूर्वकाष्ठागतो गुरुपरकाष्ठागतः शुक्रः। नन्वत्रापरपूर्वकाष्ठयोरित्य-नेनैव सिद्धे सप्तमराशिग्रहणं किमर्थम् ? उच्यते। यदि सप्तमराशिग्रहणं न क्रियते तदापरपूर्वस्था-वन्येनापि प्रकारेण भवतः। एकः प्राक्कपाले स्थितोऽपरोऽपरकपालस्थः। तदापरपूर्वकाष्ठास्थौ भवत इत्यतः सप्तमराशिग्रहणं कृतम्। तेनैतज्ज्ञापयति- यथोदयास्तयो रेखासक्तयोरयं योगो भवति नान्यथा। एवं परस्परं सप्तमराशिगौ यदा तस्मिन् काले प्रजा जनाः। रुग्भशोकपीडिताः। रोगैर्भयेन शोकेन दुःखेन च पीडिता उपहताः। पुरन्दरोज्झितमिन्द्रोत्सृष्टं वारि जलं न पश्यन्ति नावलोकयन्ति। अवृष्टिर्भवतीत्यर्थः।

नन्वत्र यथासंख्येनैवापरपूर्वककाष्ठागौ गुरुभृगू यदा भवतस्तदायं योगो भवति यथा, तथा भृगुर्गुरुश्चेत्यना पाठविप्रतिपत्त्या वा। यथासंख्येनैव कस्माद्योगो न भवति कथमनियमेन भवति। तथा च पराशरेण गुरुभृतू अपरपूर्वकाष्ठास्थावभिहतौ तथा च -

अथ उभयदर्शनान्निश्चीयते तथा ऋषीणामत्रैकवाक्यता नास्त्येवेति स्वयमेवमङ्गीकृतं तैरिति। वयं त्वत्र ब्रूमः -

उभयदर्शनाद् गुरुभृगुभ्यामनियमोऽऽचार्यस्याभिप्रेतस्तथा बृहज्जातकेऽपि प्रयोगः कृत इति। शूरस्तब्धौ सदगुणाढयौ सुविज्ञौ। चार्वङ्गेष्टौ रविशशियुतेष्वारपूर्वांशकेषु इत्यत्र च नियमव्याख्यैव यथा तथा कृतैव। अत्रापि यथा तथा गुरुभृग्वोरपरपूर्वकाष्ठास्थयोरित्यनियमव्याख्यैव ज्यायसी। सति वा नियमे पाठविप्रति-पत्तिचोदने नावत रतीति। तथा च भद्रबाही पठ्यते -

अथ सर्वैर्ग्रहैः शुक्रस्याग्रवर्तिभिः फलमाह-

**न मित्रभावे सुहृदो व्यवस्थिताः क्रियासु सम्यङ् न रता द्विजातयः।**

**न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम्।।३८, ३९।।**

**शनैश्चरे म्लेच्छाबिडालकुञ्जराः खरा महिष्योऽसितधान्यशूकराः।**

**पुलिन्दशूद्राश्च सदक्षिणापथाः क्षयं व्रजन्त्यक्षिमरुद्गदोद्भवैः।।४०।।**

शनैश्चरे शुक्रस्याग्रतः स्थिते म्लेच्छा जनाः। विडाला मार्जाराः। कुञ्चरा गजाः। खरा गर्दभाः। महिष्यः प्रसिद्धाः। अस्तिधान्यं कृष्णधान्यम्। शूकरा वराहाः। पुलिन्दा निषादजनाः। शूद्रा जनाः। ते च सदक्षिणापथा दक्षिणदिग्निवासिभिर्जनैः सहिताः। एते सर्व एवं क्षयं विनाशं व्रजन्ति। कैः? अक्षिमरुद्ग-दोद्धवैः। अक्षिषु नेत्रेषु ये गदा रोगा मरुता वायुना च ये गदास्तदुद्भवैस्त-दुत्पन्नैर्दोषैरिति।

अथ भौमेऽग्रतः स्थिते फलमाह-

**निहन्ति शुक्रः क्षितिजेऽग्रतः प्रजा हुताशशस्त्रक्षदवृष्टितस्करैः।**
**चराचरं व्यक्तमथोत्तरापथं दिशोऽग्निविद्युद्रजसा च पीडयेत्।।४१।।**

शुक्रो भार्गवः क्षितिजे भौमे अग्रतः पुरतः स्थिते सत्येवं प्रजां निहन्ति नाशयति कैः ? हुताश-शस्त्रक्षुदवृष्टितस्करैः। हुताशोऽग्निः। शस्त्रमायुधं संग्राम इत्यर्थः। क्षुद् दुर्भिक्षम् अवृष्टिरवर्षणम्। तस्कराश्चौराः। एतैः। तथोत्तरां दिशम्। चराचरम्। चरं जङ्गमाख्यमचरं स्थावराख्यं व्यक्तं निःशेषं निहन्ति। तथा दिश आशाः। अग्निविद्युद्रजसा च पीडयेत्। अग्निना हुतवहेन। विद्युता तडिता। रजसा पांशुना। एतैः पीडयेद् उपतापयेत्।

अथ बृहस्पतावग्रतः स्थिते फलमाह-

**बृहस्पतौ हन्ति पुरःस्थिते सितः सितं समस्तं द्विजगोसुरालयान्।**
**दिशं च पूर्वा करकासृजोऽम्बुदा गले गदा भूरि भवेच्च शारदम्।।४२।।**

सितः शुक्रो बृहस्पतौ पुरःस्थिते अग्रवर्तिनि सति समस्तं निःशेषं यत्किञ्चित्सितं शुक्लवर्णम्। तथा द्विजगोसुरालयान् द्विजा ब्राह्मणाः। गावः। सुरा देवाः। एषामालयं स्थानं हन्ति नाशयति द। तथा दिशमाशां च पूर्वामैन्द्रीं हन्ति। अम्बुदा मेधाः करकासृजः करकवृष्टिं सृजन्ति मुञ्चन्ति। गले कण्ठे गदा रोगा लोकानां भवन्ति। शारदं च सस्यं भूरि बहु भवेत्।

अथ बुधे अग्रतः स्थिते फलमाह-

**सौम्योऽस्तोदयोः पुरो भृगुसुतस्यावस्थितस्तोयकृद्**
**रोगान् पित्तजकामलां च कुरुते पुष्णाति च ग्रैष्मिकम्।**
**हन्यात् प्रव्रजिताग्नि होत्रिकभिषग्रङ्गोपजीव्यान् हयान्**
**वैश्यान् गाः सह वाहनैर्जरपतीन् पीतानि पश्चाद्दिशम्।।४३।।**

**शिखिभयमनलाभे शस्त्रकोपश्च रक्ते कनकनिकषगौरे व्याधयो दैत्यपूज्ये।**

**हरितकपिलरूपे श्वासकासप्रकोपः पतति न सलिलं खाद्भस्मरूक्षासिताभे।।४४।।**

**दधिकुमुदशशांककान्तिभृत् स्फुटविकसत्किरणो बृहत्तनुः।**

**सुगतिरविकृतो जयान्वितः कृतयुगरूपकरः सिताह्वयः।।४५।।**

ईदृग्रूपः सिताह्वयः सितनामा शुक्रः कृतयुगरूपकरः , कृतयुगस्य रूपं करोति, तद्धर्मानु-प्रवृत्तेर्जना व्याधिदारिद्र्यशोकवर्जिता भवन्तीत्यर्थः। कीदृशः ? दधिकुमुदशशाङ्ककान्तिभृत्। दध्नः क्षीरविकारस्य। कुमुदस्य पुष्पविशेषस्य। शशाङ्कस्य चन्द्रस्य सदृशीं कान्तिमार्भी बिभर्ति धारयति। स्फुटविकसत्किरणः, स्फुटाः स्पष्टा विकसन्तो विस्तीर्णाः किरणारश्मयो यस्य तथाभूतः। बृहत्तनुर्विस्तीर्णदेहः। सुगतिः शोभनगतिः। अवक्रो ग्रहर्क्षाणामुत्तरभागगतश्च। अविकृतो विकारर्जित उत्पातरहितः। जयान्वितो जययुक्त इति। तथा च पराशरः- **बृ.सं.,पृ-२०४**

हिमकनकरजतशङ्खस्फटिकवैदूर्यमुक्तामधुघृतमण्डकुमुदशशाङ्कच्छविस्निग्धदीप्तप्रकान्ति प्रकाशः प्रसन्नार्चिरवनिपतिहितकरः प्रशान्तवैरो दुर्भिक्षारोगवृष्टिकरश्च।

श्यावनीलरूक्षकपिलरक्तध्वस्तदीनाल्प-लोष्टसन्निभः शस्त्रवैरव्याधिवर्षान्नक्षयकरः। तथा च -

## ८. शनैश्चरचाराध्यायः

तत्रादावेव शनैश्चरस्य नक्षत्रावस्थितिवशेन फलमाह-

**श्रवणानिलहस्तार्द्रा भरणीभाग्योपगः सुतोऽर्कस्य।**

**प्रचुरसलिलोपगूढां करोति धात्रीं यदि स्निग्धः।।१ ।।**

**अहिवरुणपुरन्दरदैवतेषु सुक्षेमकृन्न चातिजलम्।**

**क्षुच्छस्त्रावृष्टिकरो मूलेप्रत्येकमपि वक्ष्ये।।२ ।।**

श्रवणानिलेति। श्रवणम्। अनिलः स्वातिः। हस्तः। आर्द्रा। भरणी। भाग्यं पूर्वफल्गुनी। एतेषु नक्षत्रेष्वर्कस्य सुतः शनैश्चर उपगः प्राप्तः स्थित इत्यर्थः। तत्र यदि स्निग्धो विमलमूर्तिभवति तदा धात्रीं भूमिं प्रचुरसलिलोपगूढां प्रचुरेण प्रभूतेन सलिलेन पानीयेन उपगूढां छन्नां करोति। तथा च गर्गः-

याम्यवायव्यसावित्ररौद्रश्रवणसंस्थितः।

भवेत स्निग्धवपुः सौरो भाग्ये चैवातिवर्षदः।

अहिवरुणपुरन्दरदैवतेष्विति। अहिदैवतमाश्लेषा। वरुणदैवतं शतभिषक्। पुरन्दर इन्द्रस्तद्दैवतं ज्येष्ठा। एतेष्ववस्थितिः सौरः सुक्षेमकृत् शोभनं क्षेमं करोति। न चाति जलम्, अति प्रभूतं जलमुदकं न करोति। क्षुच्छस्त्रावृष्टिकरो मूले। मूले स्थितः क्षुद् दुर्भिक्षम्। शस्त्रं संग्रामः। अवृष्टिवर्षणम्। एताः करोति। प्रत्यकमपि वक्ष्ये। एकमेकं प्रति प्रत्येकम्। इदानी प्रत्येकं नक्षत्रमधिकृत्य वक्ष्ये कथयिष्ये। तथा च गर्गः-

अथाऽश्विनीभरण्योः समवस्थितस्य सौरस्य फलमाह-

**तुरगतुरगोपचारकक विवैद्यामात्यहार्कजोऽश्विगतः।**

**याम्ये नर्त्तकवादकगेयज्ञक्षुद्रनौकृतिकान्।।३ ।।**

अर्कजः सौरः। अश्विगतः अश्विन्यामवस्थितः। तुरगानश्वान् तुरगाणां य उपचारकास्तान् तुरगोपचारकान्। तथा कवीन् काव्यकुशलान्। वैद्यान् कायचिकित्सकान्। अमात्यान् मन्त्रिणश्च। हन्ति नाशयति। याम्ये भरण्यां नर्तनं शिल्पमस्येति नर्तकः। वादनं शिल्पमस्येति वादकः। गेयं जानातीति गेयज्ञः। क्षुद्रोऽन्यायवर्ती। नैकृतिको निषादः। एतान् हन्ति नाशयति।

अथ कृत्तिकारोहिण्योराह-

**बहुलास्थे पीड्यन्ते सौरेऽग्न्युपजीविनश्चमूपाश्च।**

**रोहिण्यां कोशलमद्रकाशिपांचालशाकटिकाः।।४।।**

सौरे शैनश्चरे बहुलासु कृत्तिकास्ववस्थिते अग्न्युपजीविनोऽग्निवार्ताः। सुवर्णकार-लोहकारायस्कारप्रभृतयः। चमूपाः सेनापतयः। एते पीड्यन्ते। रोहिण्यां स्थिते सौरे कोशला जनाः। मद्राः। काशयः पाञ्चालाः। एते जनाः। शाकटिकाः शकटोपजीविनः। एते पीड्यन्ते।

अथ मृगशिरआर्द्रयोराह-

**मृगशिरसि वत्सयाजकयजमानार्यजनमध्यदेशाश्च।**

**रौदस्थे पारतरामठतैलिकरजकचौराश्च।।५।।**

मृगशिरसि स्थिते सौरे वत्सजनाः। याजकाः। यजन्तीति याजका ऋत्विजः। यजमाना याज्ञिकाः। आर्यजनाः प्रधानजनाः। मध्यदेशाः प्रसिद्धाः। एते पीड्यन्ते। रौद्रस्थे आर्द्रास्थे पारतरा जनाः। मठा जना एव। तैलिकाः प्रसिद्धाः। रजका वस्त्ररागकृतः। चौरास्तस्कराः। एते पीड्यन्ते।

अथ पुनर्वसुतिष्ययोराह-

**आदित्ये पञ्चनदप्रत्यन्तसुराष्ट्रासिन्धुसौवीराः।**

**पुष्ये घाण्टिकघौषिकयवनवणिक्कितवकुसुमानि।।६।।**

**सार्पे जलरुहसर्पा पित्र्ये बाह्लीकचीनगान्धाराः।**

**शूलिकपारतवैश्याः कोष्ठागाराणि वणिजश्च।।७।।**

पित्र्ये मघायां बाह्लीकाः। चीनाः गान्धाराः। शूलिकाः। पारताः। सर्व एव जनाः। वैश्या वैश्यवर्णाः। कोष्ठगाराण्यविलयग्रामाः। वणिजश्च किराताः। पीड्यन्ते इति सर्वत्र योज्यम्।

अथ पूर्वफल्गुन्युत्तरफल्गुन्योराह-

**भाग्ये रसविक्रयिणः पण्यस्त्रीकन्यका महाराष्ट्रा :।**

**अर्यम्णे नृपगुडलवणभिक्षुकाम्बूनि तक्षशिला।।८।।**

**हस्ते नापितचाक्रिकचौरभिषक्सूचिकद्विपग्रहाः।**

**बन्धक्यः कौशलका मालाकाराश्च पीड्यन्ते।।९।।**

**चित्रास्थे प्रमदाजनले खकचित्रज्ञचित्रभाण्डानि।**

**स्वातौ मागधचरदूतसूतपोतप्लवनटाद्याः।।१०।।**

चित्रास्थे सौरे प्रमदाजनः स्त्रीलोकः। लेखका लिपिज्ञाः। चित्रज्ञाश्चित्रकर्मविदः। चित्रभाण्डानि नानावर्णानि भाण्डानि। बहुवर्णानीत्यर्थः। एतानि पीड्यन्ते। स्वातौ स्थिते सौरे मागधा नाम श्रावका जना वा मगधवासिनः। चरा गूढपुरुषाः। दूता गमागमकारिणः। सूताः सारथयः कथाश्रावका वा। पोतप्लवाः पोतः समुद्रो येनोत्तीर्यते तत्र ये प्लवन्ते , पोतेन यान्तीत्यर्थः। नटा नृत्यज्ञाः। आदिग्रहणादन्येऽपि ये गीतवाद्यज्ञास्ते सर्व एव पीड्यन्ते।

अथ विशाखास्थिते आह-

**ऐंद्राग्राख्ये त्रैगर्तचीनकौलूतकुङ्कुमं लाक्षा :।**

**सस्यान्यथ माञ्जिष्ठं कौसुंभं च क्षयं याति।।११।।**

**मैत्रे कुलूततङ्गणखसकाश्मीराः समन्त्रिक्रचराः।**

**उपतापं यान्ति च घाण्टिका विभेदश्च मित्राणाम्।।१२।।**

**ज्येष्ठासु नृपपुरोहितनृपसत्कृतशूरगणकुलश्रेण्यः।**

**मूले तु काशिकोशलपाञ्चालफलौषधीयोघाः।।१३।।**

**आप्येऽङ्गवङ्गकौशलगिरिव्रजामगधपुंड्रमिंथिलाश्च।**

**उपतापं यांति जना वसन्ति ये ताम्रलिप्त्यां च।।१४।।**

आप्ये पूर्वाषाढायां स्थिते सौरे अङ्ग जनाः। वङ्गा। कौशलाः। गिरिव्रजा जना एव। मगधाः। पुण्ड्राः। मिथिलाश्च। एते सर्वं एवोपतापं यान्ति उपद्रवं प्राप्नुवन्ति। ये च जनास्ताम्रलिप्त्यां नगर्यां वसन्ति तेऽप्युपतापं यान्ति।

**विश्वेश्वरेऽर्कपुत्रेश्वरन् दशार्णान्निहन्ति यवनांश्च।**

**उज्जयिनीं शबरान् पारियात्रिकान् कुन्तिभोजांश्च।।१५।।**

विश्वेश्वरे उत्तराषाढायामर्कपुत्रः शनैश्चरश्चरंस्तिष्ठन् जनान् यवनांश्च निहन्ति नाशयति। चशब्दः समुच्चये। उज्जयिनी देशम्। शबरान् जनान्। पारियात्रिकान् पारियात्रे गिरौ ये निसवन्ति तान्। कुन्तिभोजांश्च जनानेतांश्च निहन्ति नाशयति।

अथ श्रवणधनिष्ठयोराह-

**श्रवणे राजाधिकृतान् विप्राग्न्यभिषक्सुरोहितकलिङ्गान्।**

**वसुभे मगधेशजयो वृद्धिश्च धनेष्वधिकृतानाम्।।१६।।**

**साजे शतिभिषजि भिषक्कविशौण्डिकपण्यनीतिवार्तानम्।**

**आहिर्बुध्न्ये नट्यो यानकराः स्त्री हिरण्यं च।।१७।।**

शतभिषजि साजे पूर्वभद्रपदासहिये स्थितः सौरो भिषजो वैद्याः। कवयः काव्याज्ञाः। शौण्डिका मद्यपानप्रसक्ताः। पण्यवृत्तयः क्रयविक्रयजीविनः। नीतिवृत्तयो नीतिशास्त्रज्ञाः। एता् पीडयति। आहिर्बुधन्ये उत्तरभद्रपदायां नद्यः सरितः। नदीतीरे ये निवसन्ति। तथा यानकरा रथाधिकारकाः शिल्पिनस्तक्षकाः। स्त्रियो योषितः। हिरण्यं सुवर्णादि। एतान् निहन्ति।

अथ रेवत्यामाह-

**रेवत्य राजभृताः क्रौञ्चद्वीपाश्रिताः शरत्सस्यम्।**

**शबराश्च निपीड्यन्ते यवनाश्च शनैश्चरे चरति।।१८।।**

**यदा विशाखासु महेन्द्रमन्त्री सुतश्च भानोर्दहनर्क्षयातः।**

**तदा प्रजानामनयोऽतिघोरः पुरप्रभेदो गतयोर्भमेकम्।।१९।।**

**अण्डजहा रविजो यदि चित्र : क्षुद्भयकृद्यदि पीतमयूखः।**

**शस्त्रभयाय च रक्तसवर्णो भस्मनिभो बहुवैरकरश्च।।२०।।**

नीलपीतः क्षुधे। रक्तभस्मचित्रवर्णः शस्त्रवैरवकरोऽण्डजाभिहन्ता। यद्वर्णस्तद्वर्णविनाशी भवति ।

अन्यद्वर्णलक्षणमाह-

**वैदूर्यकान्तिरमलः शुभदः प्रजानां बाणातसीकुसुमवर्णनिभश्चः शस्तः।।**

**यं चापि वर्णमुपगच्छति तत्सवर्णान् सूर्यात्मजः क्षपयतीति मुनिप्रसाद :।।२१।।**

सूर्यात्मजः सौरो वैंदूर्यकान्तिविमलो वैदुर्यस्य मणेरिव कान्तिः प्रभा विमला निर्मला यस्य स तथाभूतः प्रजानां लोकानां शुभकृत्। शुभं श्रेयः करोति। तथा बाणपुष्पाणामति-कृष्णवर्णानामतसी-कुसुमानां चातिनीलवर्णानां वर्णनिभस्तत्सदृशकान्तिः शस्तः प्रशस्तः। यं चापि वर्णमुपगच्छातीति। यादृशं वर्णं सितं रक्तं पीतं कृष्णमुपगच्छति समाश्रयति तत्सवर्णांस्तत्समानवर्णान् द्विजादीन क्षपयति नाशयति। तद्यथा- श्वेतवर्णो ब्राह्मणान्नाशयति। रक्तः क्षत्रियान्। पीतो वैश्यान्। कृष्णः शूद्रानिति। इत्येवम्प्रकारो मुनीनां गर्गादीनां प्रवादो वचनमित्यर्थः। तथा च गर्गः- **बृ.सं.,पृ-२१४**

# ९. केतुचाराध्यायः

तत्रादावेवाऽऽगमप्रदर्शनार्थमाह -

**गार्गीयं शिखिचारं पराशरमसितदेवलकृतं च।**

**अन्यांश्च बहून्दृष्टवा क्रियतेऽयमनाकुलश्चारः।।१।।**

गार्गीयं गर्गप्रोक्तम्। शिखिचारं केतुचारम्। तथा पाराशरं पराशरकृतम्। असितिनामाचार्य-स्तत्स्कृतम्। देवलकृतं देवलविरचितं च। एतान् केतुचारान् दृष्टवा अवलोक्य। तथा अन्यानपि काश्यपऋषिपुत्रनारदवज्रादिविरचितान् बहून् प्रभूतान् दृष्ट्वा मया अयमनाकुलो निःसन्देहः केतुचारः क्रियते विरच्यते।

अथोदयास्तमयलक्षणमाह-

**दर्शनमस्तमयो वा नगणितविधिनास्य शक्यते ज्ञातुम्।**

**दिव्यान्तरिक्षभौमास्त्रिविधाः स्युः केतवो यस्मात्।।२।।**

**अहुताशेऽनलरूपं यस्मिंस्तत् केतुरूपमेवोक्तम्।**

**खद्योतपिशाचालयमणिरत्नादीन् परित्यज्य।।३।।**

**ध्वजशस्त्रभवनतरुतुरगकुञ्जराद्येश्वथान्तरिक्षास्ते।**

**दिव्या नक्षत्रस्था भौमाः स्युरतोऽन्यथा शिखिनः।।४।।**

ध्वजश्चिह्नम्। शस्त्रमायुधादि। भवनं गृहम्। तरुर्वृक्षंः। तुरगोऽश्वः। कुञ्जरो हस्ती। आदिग्रहणा-दन्येषु चतुष्पदादिषु दृश्यन्तेऽनलरूपास्ते केतवः आन्तरिक्षाः। तथा नक्षत्राणां तारकाणां च मध्ये ये केतवो दृश्यन्ते ते दिव्या नक्षत्रस्थाः अतोऽस्मादुक्तद्येऽन्यथा अन्ये भूमौ दृश्यन्ते ते भौमाः शिखिनः केतव इति।

अथ केतूनां मतान्तरेण संख्यामह-

**शतमेकाधिकमेके सहस्त्रमपरे वदन्ति केतूनाम्।**

**बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम्।।५।।**

एके मुनयः पराशरदाय एकाधिकं शतं केतूनां वदन्ति कथयन्ति। तथा च पराशरः-

**बृ.सं.,पृ-२१६**

तद्यथा - शतमेकोत्तरं केतूनां भवति। तेषां षोडश मृत्युनिःश्वासजाः। द्वादशाऽऽदित्य-सम्भवाः। दश दक्षमखविलयने रुद्रक्रोधजाः। सप्त पैतामहाः। पञ्चदश उद्दालकऋषेः पुत्रा। सप्तदश मरीचिकश्यप-ललाटजाः। पञ्च प्रजापतिहास्यजाः। त्रयो विभावसुखाः। धूमोद्भवश्चैकः। चतुर्दश मथ्यमानेऽमृते सोमेन सह सम्भूताः। एकस्तु ब्रह्मकोपजः इति।

एवं मतान्तराण्ययुक्त्वा स्वसिद्धान्तमाह-

**यद्येको यदि बहवः किमनेन फलं तु सर्वथा वाच्यम्।**

**उदयास्तमयैः स्थानैः स्पर्शैराधूमनैर्वर्णैः।।६।।**

फलं शुभाशुभम् वाच्यं वक्तव्यम्। उदयास्तमयौ यथा - कस्यां दिशि उदितः कस्यामोवास्तमितः। स्थानं यथा- कस्मिन्नाकाशभागे कस्य ग्रहणस्य नक्षत्रस्य वा समीपे उदितोऽ-स्तमितश्च। स्पर्शनकम्। तेन ग्रहो नक्षत्रं वा स्पृष्टम्। आधूमनः शिखयोऽभिधूमितः। वा भवन्तु किमनेन का नः क्षतिरिति।

अथ केतुचारे येषां केतूनां नाम निर्दिष्टं कियन्तं कालं यावत्फलपाको भविष्यति तेषामिति फलपाकनियमार्थमाह-

**यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकः।**

**मासैरब्दांश्च वदेत् प्रथमात्पक्षत्रयात् परतः।।७।।**

यच्चोक्तं मासैरब्दांश्च वदेत् तदेकदेशेनापि मासप्रतिमासमेकद्वित्र्यादिदिनस्पर्शनेनापि माससंख्या लभ्यत् एव सर्वथा किमनेनास्माकमसद्विकल्पेन। दिवसैः पक्षत्रयात् परतो मासान् वदेत् मासैस्तस्मादेव पक्षत्रयात् परतोऽब्दान् वदेत्। मासात् परतो दिनाधिक्ये दृष्टेऽनुपातवशाद्वक्तव्यम्। यदि दिनात्रिंशता वर्ष लभ्यते तदेष्टदिनैः किमिति ? तथा च समाससंहितायाम् - **बृ.सं.,पृ-२१८**

अथ शुभस्य केतोर्लक्षणमाह-

**ह्रस्वस्तनुः प्रसन्नः स्निग्धस्त्वृजुरुचिरसंस्थितः शुक्लः।**

**उदितो वाप्यभिदृष्टः सुभिक्षसौख्यावहः केतुः।।८।।**

**उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः।**

**इन्द्रायुधानुकारी विशेषतो द्वित्रिचूलो वा।।९।।**

ह्रस्वस्तनुः प्रसन्न इत्यस्मादुक्ताद्यो विपरीतरूपः केतुरुत्पन्नः स धूमकेतुः। स च न शुभकरः शुभं फलं न करोति। पापं करोतीत्यर्थः। तथेन्द्रायुधानुकारीः, इन्द्रायुधं चक्रचापं तत्सदृशो न शुभकरं एव। तथा द्वित्रिचूलो द्विशिखस्त्रिशिखश्चं विशेषतो न शुभकर एव। तथा च समाससंहितायाम् - **बृ.सं.,पृ-२१९**

अचिरस्थितोऽभिवृष्टस्त्वृजुः स्मितः स्निग्धमूर्तिरुदगुदितः।

अधुना केतुसहस्त्रस्य लक्षणं सफलं विवक्षुस्तत्रादावेव रविजाः पञ्चविंशतिः केतवो भवन्ति तेषां लक्षणमाह-

**हारमणिहेमरूपाः किरणाख्याः पञ्चविंशातिः सशिखाः।**

**प्रागपरदिशोर्दृश्या नृपति विरोधावहारविजाः।।१०।।**

हारो मुक्ताहारः। मणयश्चन्द्रकान्तप्रभृतयः। हेम सुवर्णम्। एतेषां सदृशरूपाः समानवर्णा ये केतवस्ते किरणाख्याः किरणसंज्ञाः। सशिखाः सचूलाः। ते च पञ्चविंशति :। रविजाः सूर्यपुत्राः प्रागपरदिशोर्दृश्याः। प्राक् पूर्वस्यामपरस्यां पश्चिमायां दिशि दृश्यन्ते। एतेषां मध्ये एक एव दृश्यते न सर्वे युगपदितं सर्वत्रेयं परिभाषा। ते च नृपतिविरोधावहाः, नृपते राज्ञो विरोधावहा विरोधप्रदाः। अनिष्टा इत्यर्थः। तथा च गर्गः- **बृ.सं.,पृ-२१९**

अथाग्निपुत्रांस्तावत् आह-

**शुकदहनबन्धुजीवकलाक्षाक्षतजोपमा हुताशसुताः।**

**आग्नेय्यां दृश्यन्ते तावन्तस्तेऽपि शिखिभयदाः।।११।।**

शुकः पक्षिविशेषो नीलपीतवर्णः। दहनोऽग्निः। बन्धुजीवकः पुष्पविशेषोऽतिलोहितः। लाक्षा वृक्षनिर्यासः। क्षतजं रक्तम्। तदुपमास्ततुल्यवर्णाः। ते च तावन्तः पञ्चविंशतिः। हुताशसुता अग्निपुत्राः। आग्नेय्यां पूर्वदक्षिणस्यां दिशि दृश्यन्ते। ते च दृष्टाः शिखिभयदा अग्निभयप्रदा इत्यर्थः। तथा च गर्गः- **बृ.सं.,पृ-२२०**

अथ मृत्युसुतांस्तावत एवाऽऽह-

**वक्रशिखा मृत्युसुता रूक्षा कृष्णाश्च तेऽपि तावन्तः।**

**दृश्यन्ते याम्यायां जनमरणकावेदिनस्ते च।।१२।।**

वक्रशिखा अस्पष्टचूडास्ते च रूक्षा अस्निग्धाः। कृष्णाश्चासितास्तेऽपि तावन्तः पञ्चविंशतिरेव। ते च मृत्युसुता मृत्योः पुत्राः। याम्यायां दक्षिणस्यां दिशि दृश्यन्ते विलोक्यन्ते। ते च जनमरकोवेदिनः। जनानां मरकमावेदयन्ति कथयन्ति। तथा च गर्गः- **बृ.सं.,पृ-२२०**

अथ भूपुत्रा द्वाविंशतिस्तानाह-

**दर्पणवृत्ताकारा विशिखाः किरणान्विता धरातनयाः।**

**क्षुद्भयदा द्वाविंशतिरैशा न्यामम्बुतैलनिभाः।।१३।।**

दर्पणवद् वृत्तः परिवर्तुल आकारो येषां ते दर्पणवृत्ताकाराः। विशिखा विचूलाः। किरणान्विता रश्मिसंयुक्ता। धरातनया भूमिपुत्रास्ते च द्वाविंशतिरैशान्यां पूर्वोत्तरस्यां दिशि दृश्यन्ते। अम्बुतैलनिभाः। अम्बु जलम्। तैलं प्रसिद्धम्। तन्निभाः। जलस्य तैलस्य वा सदृश्यः कान्तयः। एते दृष्टा क्षुद्भयं दुर्भिक्षं ददति। तथा च गर्गः- **बृ.सं.,पृ-२२१**

अथ चन्द्रसुतास्त्रयस्तानाह-

**शशिकिरणरजतहिमकुमुदकुसुमोपमाः सुताः शशिनः।**

**उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः शिखिनः।।१४।।**

शशिकिरणाश्चरश्मयः। रजतं रूप्यम्। हिमं तुषारम्। कुमुदकुन्दकुसुमे पुष्पविशेषे अतिशुक्लवर्णे। तदुपमास्तत्तुल्यवर्णास्त्रयः शिखिनः केतवश्चन्द्रस्य सुताः पुत्राः। उत्तरतः सौम्यायां दिशि दृश्यन्ते अवलोक्न्ते। ते च सुभिक्षावहाः सुभिक्षमावहन्ति कुर्वन्तीत्यर्थः। तथा च गर्गः- **बृ.सं.,पृ-२२१**

अथ ब्रह्मदण्डाख्यस्य, लक्षणमाह-

**ब्रह्मसुत एक एव त्रिशिखा वर्णैस्त्रिभिर्युगान्तकरः।**

**अनियतदिक्सम्प्रभवो विज्ञेयो ब्रह्मदण्डाख्यः।।१५।।**

ब्रह्मसुतो ब्रह्मणः पुत्र एक एव। स च त्रिशिखस्त्रिचूडः। वर्णैः सितादिभिस्त्रिभिरुपलक्षितास्ताश्च शिखाः। स तु ब्रह्मदण्डाख्यो ब्रह्मदण्डसंज्ञो विज्ञेयो विज्ञातव्यः। अनियतदिक्सम्प्रभवः। अनियतायाम-निश्चितायां दिशि सम्प्रभव उत्पत्तिर्यस्य। सर्वासु दिक्षु दृश्यत इत्यर्थः। स तु युगान्तकरो युगस्यान्तं करोति। सर्वत्र क्षयकर इत्यर्थः। तथा च गर्गः- **बृ.सं.,पृ-२२१**

एकाधिकं शतं कथितमन्यानि नवशतान्येकोनानि कथयामीत्याह-

**शतमभिहितमेकसमेतदेकेन विरहितान्यस्मात्।**

**कथयिष्ये केतूनां शतानि नव लक्षणैः स्पष्टैः।।१६।।**

**सौम्यैशान्योरुदयं शुक्रसुता यान्ति चतुरशीत्याख्याः।**

**विपुलसिततारकास्ते स्निग्धाश्च भवन्ति तीव्रफलाः।।१७।।**

शुक्रसुता भार्गवपुत्राश्चतुरशीत्याख्याः। चतुरशीतिसंज्ञाश्चतुरशीतिसंख्याश्च। सौम्यै-शान्योरुदयं यान्ति। सौम्या उत्तरा। ऐशानी पूर्वोत्तरा। तत उदयं यान्ति गच्छन्ति। ते च विपुलसिततारका विपुला विस्तीर्णाः सिताः शुक्लास्तारका येषाम्। स्निग्धा निर्मलदेहाः। ते तीव्रफला भवन्ति। अनिष्टफला इत्यर्थः। तथा च गर्गः- **बृ.सं.,पृ-२२२**

अथ षष्टिः शनैश्चरपुत्रास्तानाह-

**स्निग्धाः प्रभासमेता द्विशिखाः षष्टिः शनैश्चराङ्गरुहाः।**

**अतिकष्टफला दृश्याः सर्वत्रैते कनकसंज्ञाः।।१८।।**

स्निग्धा निर्मलाः। प्रभासमेताःकान्त्यन्विता दीप्तिमन्तः। द्विशिखा द्विचूडास्ते च षष्टिसंख्याः शनैश्चराङ्गरुहाः शनैश्चरपुत्राः। एते कनकसंज्ञाः कनककेतवः। सर्वत्र सर्वासु दिक्षु दृश्याः। अतिकष्टफला अत्यशुभफलाश्च ते। तथा च गर्गः- **बृ.सं.,पृ-२२२**

अथ गुरुसुताः पञ्चषष्टिस्तानाह-

**विकचा नाम गुरुसुताः सितैकताराः शिखापरित्यक्ताः।**

**षष्टिः पञ्चशिरधिकास्निग्धायाम्याश्रिताः पायाः।।१९।।**

षष्टिः पञ्चभिरधिका पञ्चषष्टिः केतवो विकचा नाम विकचसंज्ञा गुरुसुता बृहस्पतिपुत्राः। ते च सितैकताराः। सितः श्वेत एकस्तारको येषाम्। शिखापरित्यक्तश्चूडारहिताः। ते च स्निग्धा निर्मलदेहा याम्याश्रिता दक्षिणस्यां दिशि दृश्यन्ते। पापाः पापफला अनिष्टफला इत्यर्थः। तथा च गर्गः- **बृ.सं.,पृ-२२३**

अथैकपञ्चाशद् बुधपुत्रास्तानाह-

**नातिव्यक्ताः सूक्ष्मा दीर्घाः शुक्लाः यथेष्टदिक्प्रभवाः।**

**बुधजास्तस्करसंज्ञाः पापफलास्त्वेकपञ्चाशत्।।२०।।**

तस्करसंज्ञास्तस्करनामान् एकपञ्चाशत्केतवो बुधजाः सौम्यपुत्राः। नातिव्यक्ता नातिस्फुटाः। सूक्ष्मा अल्पदेहाः। दीर्घा आयामिनः। शुक्लाः श्वेतवर्णाः। यथेष्टदिक्प्रथवा यथेष्टायां दिशि प्रभव उत्पतिर्येषाम् सर्वासु दिक्षु दृश्यन्त इत्यर्थः। ते च पापफला अनिष्टफलाः। तथा च गर्गः- **बृ.सं.,पृ-२२३**

अथ षष्टिर्भौमपुत्रास्तानाह-

**क्षतजानलानुरूपास्त्रिचूलताराः कुजात्मजाः षष्टिः।**

**नाम्ना च कौङ्कुमास्ते सौम्याशासंस्थिताः पायाः।।२१।।**

कौङ्कुमनामानः षष्टिः केतवः कुजात्मजा अङ्गाकपुत्राः। क्षतजानलानुरूपाः। क्षतजं रक्तमनलोऽग्नि-स्तदनुरूपास्तत्सदृशाः। अतिलोहिता इत्यर्थः। त्रिचुलतारास्त्रिशिखास्त्रितारका येषाम्। ते च सौम्याशा-संस्थिता उत्तरस्यां दिशि दृश्यन्ते। पापाः पापफलाश्च। तथा च गर्गः- **बृ.सं.,पृ-२२३**

अथ त्रयस्त्रिंशद्राहुपुत्रास्तानाह-

**त्रिंशत्र्यधिका राहोस्ते तामसकीलका इति ख्याताः।**

**रविशशिगा दृश्यन्ते तेषां फलमर्कचारोक्तम्।।२२।।**

त्रिंशत्यधिकास्त्रयस्त्रिंशत्केतवो राहो : सुताः स्वर्भानुपुत्राः। ते च नामतस्तामसकीलका इति ख्याताः प्रसिद्धाः। ते च रविशशिगा अर्कचन्द्रमण्डलस्था दृश्यन्ते अवलोक्यन्ते। तेषां च फलं शुभाशुभमर्कचारोक्तं सूर्यचारे कथितम् - तामसकीलकसंज्ञा राहुसुताः केतवः इति। तथा च गर्गः- **बृ.सं.,पृ-२२४**

अथ विशंत्यधिकं शतमग्निपुत्राणामह-

**विंशत्याधिकमन्यच्छतमग्निविश्वरुपसंज्ञानाम्।**

**तीव्रानलभयदानां ज्वालामालाकुलतनूनाम्।।२३।।**

अन्यदपरं शतं विंशत्याधिकं केतुनामग्नेरग्निपुत्राणां विश्वरूपसंज्ञानां विश्वरूपनाम्नाम्। कीदृशानाम् ? ज्वालामालाकुलतनूनां ज्वालामालाभिराकुला व्याप्तास्तनवो मूर्तयो येषाम्। तथा तीव्रानलभयदानां तीव्रं घोरमनलभयमग्निभीतिं ये ददति तथा च गर्गः- **बृ.सं.,पृ-२२५**

अथ सप्तसप्ततिर्वायुपुत्रास्तानाह-

**श्यामारुणा वितारश्चामररूपा विकीर्णदीधितयः।**

**अरुणाख्या वायो : सप्तसप्ततिः पापदाः परुषाः।।२४।।**

अरुणाख्या अरुणसंज्ञाः सप्तसप्ततिः केतवो वायोः सुताः अनिलपुत्राः। श्यामारुणाः श्यामलोहितवर्णाः। वितारास्तारकवर्जिताः। चामररूपा बालव्यजनाकृतयः। विकीर्णदीधितयो व्याक्षिप्त-रश्मयः। परुषा रूक्षाः। ते च पापदा दृष्टफलदाः। अत्र येषां दिङ्नियमो नास्ति तेऽनियतदर्शनाः सर्वास्वपि दिक्षु दृश्यन्ते। तथा च गर्गः- **बृ.सं.,पृ-२२५**

अथाष्टौ प्रजापतिसुता द्वे च शते चतुरधिके ब्रह्मणः पुत्रास्तानाह-

**तारापुञ्जनीकाशा गणका नाम प्रजापतेरष्टौ।**

**द्वे च शते चतुरधिके : चतुरस्त्रा ब्रह्मसन्ताना:।।२५।।**

अष्टौ केतवो गणका नाम प्रजापतेः सुताः पुत्राः। ते च तारापुञ्चनिकाशास्ताराणां नक्षत्राणां पुञ्जाः समूहास्तदाकाराः। ते च पापफला अशुभफलदायिनः। तथा द्वे च शते चतुरधिके केतूनां च ते चतुरस्त्राश्चतुरस्त्रसंज्ञाश्चतुरस्त्राकारा आकृतयश्च। ते च ब्रह्मसन्ताना ब्रह्मणः पुत्राः पापफला एव ज्ञेयाः। ते चानियतदिक्सम्प्रभवाः। तथा च गर्गः- **बृ.सं.,पृ-२२५**

अथ द्वात्रिंशद्वरुणपुत्रानाह-

**कङ्कानाम वरुणजाद्वात्रिंशद्वंशगुल्मसंस्थानाः।**

**शिशुवत् प्रभासमेतास्तीव्रफलाः केतवः प्रोक्ताः।।२६।।**

द्वात्रिंशत्केतवः कङ्कनामानः। ते च वरुणजा यादसाम्पतेः पुत्राः। वंशगुल्मसंस्थाना वंशगुल्म-वत्संस्थानमाकृतिर्येषाम्। गुल्म एकमूलजो लतासमूहः। शशिवच्चन्द्रवत्प्रभया कान्त्या समेताः संयुक्ताः। ते च तीव्रफलाः कष्टफलाः। प्रोक्ताः कथिताः। ते चानियतदिक्सम्प्रभवाः। तथा च गर्गः- **बृ.सं.,पृ-२२६**

अथ षण्णवतिकालपुत्रानाह-

**षण्णवतिः कालसुताः कबन्धसंज्ञाः कबन्धसंस्थानाः।**

**चण्डा भयप्रदाः स्युरूपताराश्च ते शिखिनः।।२७।।**

कालसुताः कालपुत्राः कबन्धसंज्ञाः कबन्धनामानः। षण्णवतिः केतवः। ते च कबन्धसंस्थानाः। कबन्धश्छिन्नशिराः पुरुषस्तद्वत्संस्थनमाकृतिर्येषाम्। ते च विरूपताराः। विरूपा अस्फुटास्तारका येषाम्। ते शिखिनः केतव : पुण्ड्राभयप्रदाः। पुण्ड्रा नाम जनपदा-स्तेषामभयप्रदाः श्रेयस्कराः। स्युर्भवेयुः। अन्यत्र पुनर्भयदाः ते चानियतदिक्सम्प्रभवाः। तथा च गर्गः- **बृ.सं.,पृ-२२७**

अथ नव विदिक्पुत्रान् सर्वेषां न संख्यानमन्येषां विशेषं च वक्ष्यामीत्याह-

**शुक्लविपुलौकतारा नव विदिशां केतवः समुत्पन्नाः।**

**एवं केतुशस्त्रं विशेषमेषामतो वक्ष्ये।।२८।।**

विदिशां दिगन्तरालानां नव समुत्पन्ना विदिक्पुत्रा इत्यर्थः। किम्भुताः शुक्लविपुलैकताराः। शुक्लः श्वेतवर्णो विपुलो विस्तीर्णं एकस्तारको येषाम्। ते च विदिक्ष्वेव दृश्यन्ते। दृष्टाश्च पापफलाः। तथा च गर्गः- **बृ.सं.,पृ-२२७**

एवं केतुसहस्त्रमिति। एवं केतूनां सहस्त्रं कथितमुक्तम्। अतोऽनन्तरमेतेषामेव केतूनां विशेषं विशेषलक्षणं वक्ष्ये कथयिष्ये।

**उदगायतो महान् स्निग्धमूर्तिरपरोदयी वसाकेतुः।**

**सद्यः करोति मरकं सुभि क्षमप्युत्तमं कुरुते।।२९।।**

**तल्लक्षणोऽस्थिकेतुः स तु रूक्षः क्षुद्भयावहः प्रोक्तः।**

**स्त्रिग्धस्तादृक प्राच्यां शसत्राव्यो ऽमरमरकाय।।३०।।**

तदित्यनने वसाकेतोः परामर्शः। अस्थिकेतुर्नाम केतुः स तल्लक्षणः। तल्लक्षणैर्वसाकेतोः सदृशैर्युक्तः – उदगायतो महान् स्निग्धमूर्तिरपरोदयी इति किन्त्वयं विशेषः स तु रूक्षो भवति स्नेहरहितः। दृष्टश्च क्षुद्भयावहो दुर्भिक्षभयप्रदः प्रोक्तः कथितः। स्निग्धस्तादृगिति। तादृग् वसाकेतुसदृशः स्निग्धो निर्मलदेहः प्राच्यां पूर्वस्या दिशि दृश्यते। स तु शस्त्राख्यः शस्त्रकेतुसंज्ञो दृष्टो डमरमरकाय भवति। डमरं शस्त्रकलहं मरकं च करोति। तथा च पराशरः- **बृ.सं.,**

**दृश्योऽमावास्यायां कपालकेतुः सधूम्ररश्मिशिखः।**

**प्रागभसोऽर्धविचारी क्षुन्मरकावृष्टिरोगकरः।।३१।।**

अथादित्यजानां कपालकेतुरुदयतेऽमावस्यायां पूर्वस्या दिशि सधूम्रर्चिशिखो नभोसऽर्द्धचरो दृश्यते। पञ्चविंशवर्षशतं प्रोष्य त्रीश्च पक्षानमृतजस्य कुमुदकेतोश्चारान्ते स दृष्ट एव दुर्भिक्षानावृष्टिव्याधिभय-मरोणोपद्रवान् सृजति। जगति यावतो दिवसान् दृश्यते तावन्मासान् मासैर्वत्सरान् पञ्चप्रस्थं च शारदान्यार्धं कृत्वा प्रजानामपयुङ्क्ते।

तथा रौद्रकेतुमाह-

**प्राग्वैश्वानरमार्गे शूलाग्रः श्यावरूक्षताम्रार्चिः।**

**नभसस्त्रिभागगामी रौद्रइवि कपालतुल्यफलः।।३२।।**

**सप्तमुनीन् संस्पृश्य घ्रुवभिजितमेव च प्रतिनिवृतः।**

**नभसोऽर्द्धमात्रमित्वा याम्येनास्तं समुपयाति।।३३, ३४।।**

**अन्यानपि च स देशान् क्वचित् क्वचिद्धन्ति रोगदुर्भिक्षैः।**

**दश मासान् फलपाकोऽस्य कैश्चिदष्टादश प्रोक्तः।।३५, ३६।।**

अन्यानपि च स देशानिति। स चलकेतुरन्यानपरान् देशानपि रोगदुर्भिक्षैः क्वचित् क्वचिद्धन्ति नाशयति न सर्वत्र। अस्य केतोर्दश मासान् यावत्फलपाकः। दर्शनात् त्रिपक्षात्परतो यादद्दशमासांस्ता-वदशुभं फलं ददाति। कैश्चिदन्यैर्गर्गादिभिरष्टादश मासान् यावत् फलपाकः प्रोक्तं कथितः। तथा च पराशरः- **बृ.सं.,पृ-२३०**

अथ पैतामहश्चलकेतुः पञ्चदशवर्षशतं प्रोष्योदितः पश्चिमेनाङ्गुलिपर्वमात्रां शिखां दक्षिणाभिगतां कृत्वा जलकेतोश्चारान्ते नभसस्त्रिभागमनुचरन् यथा यथा चोत्तरेण व्रजति तथा तथा शुलाग्राकारां शिखां दर्शयन् ब्रह्मनक्षत्रमुपसृत्य मनाग् ध्रुवं ब्रह्मराशिं सप्तर्षीन् स्पृशन् नभसोऽर्द्धमात्रं दक्षिणमनुक्र-म्यास्तं व्रजति। स स्वर्गे दारुणकर्मा। स्वर्गप्राप्तत्वादेव च कृत्स्नमभिहिनस्ति लोकम्। अपि च भूमिं कम्पयित्वा दश मासान्मध्यदेशे भूमिष्ठं जनपदमनवशेषं कुरुते। तेष्वपि क्वचित् क्वचिच्छस्त्रदुर्भिक्षव्याधिमकरकभयैः क्लिश्नात्यष्टादश मासानिति। तथा च गर्गः- **बृ.सं.,पृ-२३०**

अथ श्वेतकेतुलक्षणमाह-

**प्रागर्द्धरात्रद्दश्यो याम्याग्रः श्वेतकेतुरन्यश्च।**
**क इति युगाकृतिरपरे युगपतौ सप्तदिनद्दश्यौ।।३७।।**

**स्निग्धौ सुभिक्षशिवदावथाधिक द्दश्यत कनामा यः।**
**दश वर्षाण्युपतापं जनयति शास्त्रप्रकोपकृतम्।।३८।।**

**श्वेत इति जटाकारो रूक्षः श्यावो वियत्त्रिभागगतः।**
**विनिवर्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते।।३९।।**

**आधूम्रया तु शिखया दर्शनमायाति कृत्तिकासंस्थः।**
**ज्ञेयः स रश्मिकेतुः श्वेतसमानफलं घत्ते।।४०।।**

आधूम्रवर्ण्या शिखयोपलक्षितस्तथा कृत्तिकासंस्थः समीपे दर्शनमुदयमायाति गच्छति स रश्मिकेतुर्नाम केतुर्ज्ञेयो ज्ञातव्यः। त स श्वेतसमानं श्वेतकेतुसदृशं फलं धते ददाति। त्रिभागशेषा प्रजाः कुरुत इत्यर्थः। तथा च पराशरः- **बृ.सं.,पृ-२३२**

अथ रश्मिकेतुर्विभावसुजः प्रोष्य वर्षशतमावर्तकेतोश्चारान्ते उदितः कृत्तिकासु धूम्रशिखः श्वेतकेतोः सदृशफलः।

अथ ध्रूवकेतोर्लक्षणमाह-

**घ्रुवकेतुरनियतगतिप्रमाणवर्णाकृतिर्भवति विष्वक्।**

**दिव्यान्तरिक्षभौमो भवत्ययं स्निग्ध इष्टफलः।।४१।।**

**सेनाङ्गेषु नृपाणां गृहतरुशैलेषु चापिदेशानाम्।**

**गृहिणामुपस्करेषु विनाशिनां दर्शनं याति।।४२।।**

एष चैवंविधानां विनाशानां मुमूर्षूणां दर्शनमुदयं याति गच्छति। नृपाणां राज्ञां विनाशिनां सेनाङ्गेषु अश्वोपकरणेषु खलीनपर्याणादिषु दर्शनं याति। देशानां विनाशिनां गृहतरुशैलेषु। गृहेषु वेश्मसु। तरुषु वृक्षेषु। शैलेषु पर्वतेषु च दृश्यते। तथा गृहिणां गृहस्थानामुपस्करेषु भाण्डेषु दर्वीशूर्पमार्जन्यादिषु विनाशिनामेव दर्शन याति। तथा च पराशरः- **बृ.सं.,पृ-२३२**

**कुमुद इति कुमुदकान्तिर्वारुण्यां प्राक्छिखो निशामेकाम्।**

**दृष्टः सुभिक्षमतुलं दश किल वर्षाणि स करोति।।४३।।**

कुमुद इति कुमुदनामा केतुः। स तु कुमुदकान्तिः कुमुदाभः। श्वेतवर्ण इत्यर्थः। स तु वारुण्यां पश्चिमायां दिशि। प्राक्शिखः पूर्वाग्रो निशां रात्रिमेकामेव दृश्यते। किलेत्यागमसूचने। स तु दृष्टो दशवर्षाण्यतुलमसमं सूभिक्षं करोति। तथा च पराशरः-

अथामृतजः कुमुदो मणिः। जलोद्भवः पद्मः। आवर्तः। ऊर्मिः। शङ्खः। हिमः। रक्तः। कुक्षिः। कामः। विसर्पणः। शीतश्चेति।

**सकृदेकयामदृश्यः सुसूक्ष्मतारोऽपरेण मणिकेतुः।**

**ऋज्वी शिखास्य शुल्का स्तनोद्गता क्षीरधारव।।४४।।**

**उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्द्धान्।**

**प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम्।।४५।।**

असौ केतुरुदयन्नेवोदितमात्र एव चतुरः सार्द्धान् अर्द्धपञ्चमान् मासान् क्षेमं सुभिक्षमृत्पादयति करोति। प्रायो बाहुल्येन क्षुदजन्तूनां नकुलादीनां प्रादुर्भावमुत्पत्तिं करोति। तथा च पराशरः- **बृ.सं.,पृ-२३३**

**जलकेतुरपि च पश्चात् स्निग्धः शिखयापरेण चोन्नतया।**

**नव मासान् स सुभिक्षं करोति शान्तिं च लोकस्य।।४६।।**

जलकेतुर्नाम केतुः सोऽपि पश्चात् पश्चिमायां दिशि दृश्यते। स्निग्धो निर्मलदेहः। अपरेण पश्चिमेन। चोन्नतया उच्चया शिखया चूडया युक्तः। स च दृष्टो नव मासान् यावत् सुभिक्षं करोति। लोकस्य जनपदस्य च शान्तिं श्रेयः करोति। तथा च पराशरः- **बृ.सं.,पृ-२३४**

**भवकेतुरेकरात्रं द्दश्यः प्राक् सूक्ष्मतारकः स्निग्धः।**

**हरिलाङ्गूलोपमया प्रदक्षिणार्त्तया शिखया।।४७।।**

**यावत एव मूहूर्त्तान् दर्शनमायाति निर्दिशेन्मासान्।**

**तावदतुलं सुभिक्षं रूक्षे प्राणान्कितन् रोगान्।।४८।।**

**अपरेण पद्मकेतुर्मृणालगौरो भवेन्निशामेकाम्।**

**सप्त करोति सुभिक्षं वर्षाण्यतिहर्षयुक्तानि।।४९।।**

पद्मकेतुर्नाम केतुः। अपरेण पश्चिमायां दिशि निशां रात्रिमेकां दृश्यते। कीदृशः ? मृणालगौरः, मृणालवद् गौरा मृणालगौरः। मृणालं बिसतन्तु। तद्वद् गौरः। श्वेत इत्यर्थः।

अथ पद्मकेतुः श्वेतकेतुफलसमाप्तौ पश्चिमेनाह्लादयन्निव मृणालकुमदाभया शिखयैकरात्रचरः। सप्त वर्षाण्यभ्युच्छ्रितं हर्षमावहति जगतः।

अथावर्तकेतोर्लक्षणमाह-

**आवर्त इति निशार्धे सव्यशिखोऽरुणनिभोऽपरे स्निग्धः।**

**यावत्क्षणान् स द्दश्यस्तावन्मासान् सुभिक्षकरः।।५०।।**

अथावर्तकेतुः श्वेतकेतोः कर्मण्यतीतेऽपरस्यामर्द्धारात्रे शङ्खावदातोऽरुणाभया प्रदक्षिणनताग्रया शिखयोदितः। स यावन्मुहूर्तान् दृश्यते तावन्मासान् भवत्यतीव सुभिक्षं नित्ययज्ञोत्सवं जगत्।

अथ संवर्तकेतोर्लक्षणमाह-

**पश्चात् सन्ध्याकाले संवर्तो नाम धूम्रताम्रशिखः।**

**आक्रम्य वियत्त्र्यंशं शूलाग्रावस्थितो रौद्रः।।५१।।**

**यावत एव मुहूर्तान् द्दश्यो वर्षाणि तावन्ति।**

**भूपाञ्छस्त्रनिपातैरुदयर्क्षे चापि पीडयति।।५२।।**

स च केतुर्यावतो मुहूर्तान् दृश्यो भवति। तावत्संख्यानि वर्षाणि हन्ति नाशयति। अशुभ-ख्फलप्रदो भवतीत्यर्थः। तथा भूपान् नृपान्। शस्त्रनिपातैः संग्रामैर्हन्ति नाशयति। तथोदयर्क्षम्। यस्मिन्नक्षत्रे उदितो दृश्यते तच्च पीडयत्युपतापयति। तथा च पराशरः- **बृ.सं.,पृ-२३६**

**ये शस्तास्तान् हित्वा केतुभिराधूतिमेऽथवा स्पष्टे।**

**नक्षत्रे भवति वधो येषां राज्ञां प्रवक्ष्ये तान्।।५३।।**

**अश्विन्यामश्मकपं भरणीषु किरातपार्थिवं हन्यात्।**

**बहुलासु कलिङ्गेशं रोहिण्यां शूरसेनपतिम्।।५४।।**

**औशीनरमपि सौम्ये जलजाजीवाधिपं तथार्द्रासु।**

**आदित्येऽश्मकनाथं पुष्ये मगधाधिपं हन्ति।।५५।।**

**असिकेशं भौजङ्गे पित्र्येऽङ्गं पाण्डयनाथमपि भाग्ये।**

**औज्जयनिकमार्यम्णे सावित्रे दण्डकाधिपतिम्।।५६।।**

**चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत्तज्ज्ञः।**

**काश्मीरककाम्बोजौ नृपती प्राभञ्जने न स्तः।।५७।।**

चित्रासु केतुनाभिधूपितासु स्पृष्टासु वा कुरुक्षेत्राधिपस्य मरणं वधम्। तज्ज्ञः केतूषघातज्ञः समादिशेद्वदेत्। प्राभज्जने स्वातौ काश्मीरककाम्बोजौ नृपती राजानौ न स्तो न भवतः।

अन्येष्वाह-

**इक्ष्वाकुरल्लकनाथौ हन्येते यदि भवेद्विशाखासु।**

**मैत्रे पुण्ड्राधिपतिर्ज्येष्ठास्वथ सार्वभौमवधः।।५८।।**

**मूलेऽन्ध्रमद्रकपती जलदेवे काशिपो मरणमेति।**

**यौघेर्यकार्जुनायनशिबिचैद्यान् वैश्वदेवे च।।५९।।**

**हन्यात् कैकयनाथं पाञ्चनदं सिंहलाधिपं वाङ्गम्।**

**नैमिषनृपं किरातं श्रवणादिषु षट्स्विमान् क्रमशं।।६०।।**

**उल्काभिस्ताडितशिखः शिखी शिवः शिवतरोऽभिवृष्टो यः।**

**अशुभः स एव चोलाफगाणसितहू-णचीनानाम्।।६१।।**

यः शिखी केतुः। उल्काभिताडितशिखः। उल्कया अभिमुख्येन ताडिता हता शिखा चूडा यस्य। स शिवः श्रेयस्करः। योऽतिदृष्ट उदितमात्र एव दृष्टः स शिवतरोऽतिशयेन शुभप्रदः। स एव केतुरेवंविधश्चोलानामावगाणानां सितानां हूणानां चीनानां चाशुभोऽश्रेयस्करः सर्व एव जनाः।

अन्यद्विशेषमाह-

**नम्रा यतः शिखिशिखाभिसृता यतो वा ऋक्ष च यत् स्पृशति तत्कथितांश्च देशान्।**

**दिव्यप्रभावनिहतान् स यथा गरुत्मान् भुंक्ते गतो नरपतिः परभोगिभोगान्।।६२।।**

यतो यस्यां दिशि। शिखिशिखा केतुशिखा। नम्रा वक्रा। शिखिनः शिखा शिखिशिखा। अभिृता यतो वा। यस्यां दिशि। अभिसृता गन्तुं प्रवृत्ता। अथवा यदृक्षं नक्षत्रं स्पृशति स्पर्शयति। तत्कथितांश्च देशान्। यस्यां दिशि शिखा नम्रा तत्र ये देशाः। यस्यां वा गन्तुं प्रवृत्ता तत्र ये देशा यन्नक्षत्रं स्पृशन्ति तस्य च नक्षत्रस्य ये देशा वक्ष्यमाणास्तान् कथितास्तदुक्तान् देशान् नरपती राजा गतो भुङ्क्ते स्वीकरोति। कीदृशान् देशान् ? दिव्यप्रभावनिहतान्। दिव्येनाप्रतिहतेन प्रभावेण विक्रमेण निहतान् निर्जितान्। कीदृशान ? परभोगविभोगान्। परैरन्येर्भोगिभिर्भुज्यन्ते य भोगा ग्रामास्तान्। कथं स राजा भुङ्क्ते ? यथा गरुत्मान् गरुडो दिव्यप्रभावनिहतान् परभोगिभोगान् भुङ्क्ते। परा उत्कृष्टा ये भोगिनः सर्पास्तेषां भोगाः शरीराण्यङ्गानि वा तान्। यथा येन प्रकारेण। तथा तेन प्रकारेणति। तथा च पराशरः- **बृ.सं.,पृ-२४०**

# १०.अगस्त्यचाराध्यायः

अगस्त्यमुनिवर्णनम्

**भानोर्वर्त्मविघातवृद्धशिखरो विन्ध्याचलः स्तम्भितो**

**वातापिर्मुनिकुक्षिभित् सुररिपुर्जीर्णश्च येनासुरः।**

**पीतश्चाम्बुनिधिस्तपोऽम्बुनिधिना याम्या च दिग्भूषिता**

**तस्यागस्त्यमुनेः पयोद्युतिकृतश्चारः समासादयन्।।**

तत्रादावेवागस्त्यस्य मुनेः प्राधान्यद्वारेण समुद्रशोभामुपवर्णयितुमाह-

**समुद्रोऽन्तः शैलैर्मकरनखरोत्खातशिखरैः**

**कृतस्तोयोच्छित्त्या सपदि सुतरां येन रुचिरः।**

**पतन्मुक्तामिश्रैः प्रवरमणिरत्नाम्बुनिवहैः**

**सुरान् प्रत्यादेष्टुं सितमुकुटरत्नानिव पुरा।।१।।**

येन भगवताऽगस्त्यमुनिना। पुरा पूर्वम्। तोयोच्छित्या जलापहरणेन। सपदि तत्क्षणमेव। समुद्रः सागरः अ सुतरामतिशयेन। रुचिरो रम्यः। कृतः सम्पादितः। तस्य मुनेरुदयः श्रूयतामिति वक्ष्यमाणेन सम्बन्धः। रम्यः कैः कृतः ? अन्तः शैलैः। अन्तर्मध्ये ये स्थिता मैनाकप्रभृतयः शैलाः पर्वतास्यैः। ते किलेन्द्रभयात्तत्र पूर्वं प्रविष्टाः। कीदृशैः ? मकरनखरोत्खातशिखरे :। मकरा जलप्राणिविशेषाः। तेषां ये नखाः कठिनत्वात् त एव नखराः। तैर्मकरनखरैरुत्खातानि शिखराणि येषां तैः। ते किल कण्डूमपनेतुं परुषत्वात्तान्युत्खनन्ति। तथा यः समुद्रः सुरान् देवान्। प्रत्यादेष्टुं प्रत्याख्यातुमभिभवितुमिव दृष्टान्तीकर्तुमिव। कीदृशान् सुरान् ? मितमुकुटरत्नान्। मितानि परिमितानि मुकुटेषु मौलिषु रत्नानि येषां तान्। तथाभूतान्। कैः प्रत्यादेष्टुमिव ? पतन्मुक्तामिश्रैः प्रवरमणिरत्नाम्बुनिबहैः। अम्बुनिबहैः पानीयौधैः। कीदृशैः ? पतन्मुक्तामिश्रैः पतन्तीभिर्मुक्ता-भिर्मिश्रास्तैः। तथा प्रवराणि विकचानि च तानि मणिरत्नानि प्रधानरत्नानि। प्रवरमणिरत्नानि चाम्बुनिवहाश्च प्रवरमणिरत्नाम्बुनिवहास्तैः।

अन्यदप्याह-

**येन चाम्बुहरणेऽपि विद्रुमैर्भूधरैः समणिरत्नविद्रुमैः।**

**निर्गतैस्तदुरगैश्च राजितः सागरोऽधिकतरं विराजितः।।२।।**

**प्रस्फुरत्तिमिजलेभजिह्मगः क्षिप्तरत्ननिकरो महोदधिः।**

**आपदां पदंगतोऽपि यापितो येन पीतसलिलोऽ-मरश्रियम्।।३।।**

येन महोदधिः समुद्रः। आपदां पदगतोऽपि विपदां स्थानं प्राप्तोऽपि। पीतसलिलः पीतजलोऽपि। अमरश्रियं सुरलक्ष्मीम्। यापितः प्रापितः। कीदृशः? प्रस्कुरत्तिमिजलेभजिह्मगः। प्रस्कुरन्तस्मियश्चलन्तो मत्स्याः। जलेभो जलहस्तिनः। जिह्मगाः सर्पा यस्मिन्। जिह्मं कुटिलं क्षिप्रः परिक्षिप्तो रत्नानां मणीनां निकरः समूहो यस्मिन्। तथा सुरलोकः प्रस्फुरत्तिमिजलेभह्मिगः। प्रस्फुरन्तश्चलन्तो ये सुास्तिमिजले-भजिह्मगाः। तिमिगा मत्स्य वाहनाः केचित्। यथा वितस्ता नदी। केचिज्जलगाः पानीयस्थाः। यथा समुद्रे भगवानारायणः। केचिदिभगा हस्तिनो गताः। यथेन्द्र ऐरावतस्थः। केचिज्जिह्मं कुटिलं गच्छन्तीति जिह्मगाफ कुटिलगतयः। यथा भौमादयस्ताराग्रहा वक्रिताः। तथा क्षिप्तरत्नकिरः सोऽपि।

अथान्यदाह-

**प्रचलत्तिमिशुक्तिशंखचितः सलिलेऽपहृतेऽपि पतिः सरिताम्।**
**सतरङ्गसितोत्पलहंसभृतः सरसः शरदीव बिभर्ति रुचम्।।४।।**

**तिमिसिताम्बुधरं मणितारकं स्फटिकचंद्रमनम्बुशरद्द्युति।**
**फफिणोपलरश्मिशिखिग्रहं कुटिलगेशवियच्च चकारयः।।५।।**

**दिनकररथमार्गच्छित्तयेऽभ्युद्यतं यच्चलच्छृङ्ग-**
**मुद्भ्रान्तविद्याधरांसावासक्तप्रियाव्यग्रदत्ताङ्कदेहाव-**
**लम्बाम्बरात्युच्छ्रितोद्धूयमानध्वजैः शोभितम्।**
**करिकटमदमिश्ररक्तावलेहानुवासानुसारि-**
**द्विरेफावलीनोत्तमाङ्गैः कृतान् बाणपुष्पैरिवोत्तंसकान्**
**धारयाद्भिमृगेन्द्रैः सनाथीकृतान्तर्दरीनिर्झरम्।**
**गगनतल-मिवोल्लिखन्तंप्रवृद्धैर्गजाकृष्टफुल्लद्रुम-**
**त्रासविभान्तमचद्विरेफावलीगीतमन्द्रस्वनैः**
**शैलकूटैस्तरक्षर्क्षशार्दूलशाखामृगाध्यासितैः।**
**रहसि मदनसक्तया रेवया कान्तयेवोपगूंढः सुराध्यासितो**
**द्यानमम्भोऽश-नानन्नूमलानिलहारविप्रान्वितं**
**विन्ध्यमस्तम्भयद्यश्च तस्योदयः श्रूयताम्।।६।।**

**उदये च मुनेरगस्त्यनाम्रः कुसमायोगमलप्रदूषितानि।**

**हृदयानि सतामिवस्वभावात् पुनरम्बूनि भवन्ति निर्मलानि।।७।।**

अगस्त्यनाम्नो मुनेरुदये उद्गमे। पुनर्भुचः। अम्बूनि पानीयानि। स्वभावात् प्रकृत्यैव। निर्मलानि प्रसन्नानि भवन्ति। कीदृशानि ? कुसमायोगमलप्रदूषितानि। कोर्भूम्याः समायोगः संश्लेषः कुसमायोगः। तस्मात् कुसमायोगाद्यन्मलं पङ्कः। तेन प्रदूषितानि दुष्टानि यानि तान्यगस्त्यदर्शनान्नि-र्मलानि भवन्ति। वर्षासु कुसमायोगस्तेषाम्। यथा सतां साधूनां उदये दर्शने हृदयानि पुनर्निर्मलानि भवन्ति। कीदृशानि ? कुसमायोगमलप्रदूषितानि। कुत्सितैर्जनैर्योऽसौ समायोगस्तस्माद्यन्मलं पापं तेन प्रदूषितानि दुष्टानि। पुनः स्वभावादेव निर्मलानि भवन्ति। साधुदर्शतात् पापक्षय उत्पद्यते यावत्।।

अथ विन्ध्यवर्णनानन्तरं शरद्वर्णनमाह-

**पार्श्वद्वयाधिष्ठितचक्रवाकामापुष्णती सस्वनहंसपंक्तिम्।**

**ताम्बूलरक्तोत्कषिताग्रदन्ती विभाति योषेव सरित्सहासा।।९।।**

शरत् सहासा हासयुक्त योषा स्त्रीव विभाति शोभते। कीदृशी योषा ? ताम्बुंलरक्तोत्कषिताग्र-दन्ती। ताम्बुलेन रक्ता रज्जिता ये दन्ता रदाः। तेभ्योऽग्रदन्ताः पुरोवर्तिनो रदा उत्कषिता उद्धृष्टा यया सा तथाभूता स्त्री। शरत्कीदृशी ? पार्श्वद्वयाधिष्ठितचक्रवाकामापुष्णती सस्वनहंसपङ्क्तिम्। पार्श्व-द्वयमधिष्ठितं संयुक्तम्। चक्रवाकैः पक्षिविशेषैलोहितवर्णैर्यस्याः सस्वानायाः शब्दयुक्ताया शब्दयुक्ताया हंसपङ्क्तेस्तामापुष्णती आपोषयमाणा। नदीनां प्रत्यहं जलाल्पत्वात् पुलिनानि व्यक्तानि भवन्ति। तानि च हंसैः सेव्यन्ते। अत एवोत्प्रेक्ष्यते ताम्बूलरक्तोत्कषिताग्रदन्ती योषा सहासेव।

अन्यदप्याह-

**इन्दीवरासन्नसितोत्पलान्विता सरिद्भ्रमत्षट्पदपंक्तिभूषिता।**

**सभ्रूलताक्षेपकटाक्षवीक्षणा विदग्घयोषेव विभाति सस्मरा।।९।।**

**इन्दोः पयोदविगमोपहितां विभूतिं द्रष्टुं तरंगवलया कुमुदं निशासु।**

**उन्मीलयत्यलिनिलीनदलं सुपक्ष्म वापीविलोचनमिवासिततारकान्तम्।।१०।।**

**नानाविचित्राम्बुजहंसकोककारण्डवापूर्णतडागहस्ताः।**

**रम्यैः प्रभूतैः कुसुमैः फलैश्च भूर्यच्छाती-वार्घमगस्त्यनाम्रे।।११।।**

भूर्भूमिः। अगस्त्यमाने अर्घं यच्छतीव ददाति इव। कीदृशी भूः ? नानाविचित्राम्बु-जहंसकोक-कारण्डवापूर्णतडागहस्ता। नानाप्रकारो विचित्रा ये अम्बुजाः पद्मादयः। तथा हंस कोककाराण्डवाः पक्षिविशेषाः। तैर्यान्यापूर्णानि तडागानि। तान्येव हस्ता यस्या। कैरर्घं यच्छतीव? रत्नैः प्रभूतैः कुसुमैः फलैश्चेति। त एवाम्बुजादयो हस्तस्थिता रत्नादीन्युपलक्ष्यन्ते। तै रत्नैः। प्रभूतैर्बहुभिः। तथा कुसुमैः पुष्पैः फलैश्चेति। यतो भगवते रत्नादिभिरर्घो दीयत इति।

अथ भगवतः प्राधान्यमाह-

**सलिलममरपाज्ञयोज्झितं यद्घनपरिवेष्टितमूर्तिभिर्भुजंगैः।**
**फणिजनितविषाग्निसम्प्रदुष्टं भवति शिवं तदगस्त्यदर्शनेन।।१२।।**

अमरप इन्द्रः। तदाज्ञया यत्सलिलं जलम्। उज्झितमुत्सृष्टम्। भुजङ्गैः सर्पैः। कीदृशैः? घनपरिवेष्टितमूर्तिभिः। घनैर्मेघैः। परिवेष्टिता मूर्त्तयो देहा येषां तैः। कीदृशं जलम? फणिजनितविषा-ग्निसम्प्रदुष्टम्। फणिनः सर्पाः। तेभ्यो जनितमुत्पादितं यद्विषम्। तदेवाग्निर्वह्निः। तेन सम्प्रदृष्टं सम्यग् दूषितम्। तदगस्त्यदर्शनेन शिवं श्रेयस्करं भवति।

अथान्यदप्याह-

**स्मरणादपि पापमपाकुरुते किमुत स्तुतिभिर्वरुणाङ्गरुहः।**
**मुनिभिः कथितोऽस्य यथार्घविधिः कथयामि तथैव नरेन्द्रहितम्।।१३।।**

**संख्याविधानात् प्रतिदेशमस्य विज्ञाय सन्दर्शनमादिशेज्ज्ञः।**
**तच्चोज्जयिन्यामगतस्य कन्यां भागैः स्वराख्यैः स्फुटभास्करस्य।।१४।।**

अस्यागस्त्यमुनेः संख्याविधानाद् गणितविधानात् प्रतिदेशं देशं देशं प्रति सन्दर्शनमुदयं विज्ञाय ज्ञात्वा ज्ञः पण्डित आदिशेद् वदेत्। तच्च दर्शनमुज्जयिन्यां स्फुटभास्करस्य स्फुटादित्यस्य कन्यां कुमारी स्वराख्यैर्भागैः सप्तभिरंशैरगतस्याप्राप्तस्य भवति। सिंहस्य भागत्रयोविंशतिं भुक्त्वेत्यर्थः। तथा च समाससंहितायाम् –

अथार्धदानलक्षणमाह-

**ईषत्प्रभिन्नेऽरुणरश्मिजालैर्नैशेऽन्धकारे दिशिदक्षिणस्याम्।**
**सांवत्सरावेदितदिग्वभागे भूपोऽर्घमुख्यः प्रयतः प्रयच्छेत्।।१५।।**

**कालोद्भवैः सुरभिभिः कुसुमैः फलैश्चरतैश्च सागरभवैः कनकाम्बरैश्च।**
**घेन्वा वृषणे परमान्नयुतैश्च भक्ष्यैर्दध्यक्षतैः सुरभिधूपविलेपनैश्च।।१६।।**

कालोद्भवैः सुकालजातैः। सुरभिभिः सुगन्धैः। कुसुमैः पुष्पै। फलैश्च जातीफलादिभिः। तथा रत्नैर्मणिभिः। सागरभवैः समुद्रजातैः। कनकेन सुवर्णेनाम्बरैर्वस्त्रैः। तथा धेन्वा पयस्विन्या

गवा वृषेण दान्तेन। परमान्नेन पायसेन युतैश्च भक्ष्यैरपूपादिभिस्तथा दध्ना क्षीरविकारेण। अक्षतैर्यवैः। सुरभिधूपैः सुगन्धधूपैर्विलेपनैरनुलेपनैः सुगन्धिभिश्च।

अथार्धं दातुर्नृपस्य फलमाह-

**नरपतिरिममर्घ श्रद्दधानो दधानः प्रविगतगददोषो निर्जितारातिपक्षः।**

**भवति यदि च दद्यात् सप्त वर्षाणि सम्यग् जलनिधिरसनायाः स्वामितां याति भूमेः।।१७।।**

**द्विजो यथालाभमुपाहृताघः प्रोय़्रोति वेदान् प्रमदाश्च पुत्रान्।**

**वैश्यश्च गां भूरिधनं च शूद्रो रोगक्षयं घर्मफलं च सर्वे।।१८।।**

द्विजो ब्राह्मणो यथालाभं यथासम्भवमुपाहृतार्घो दत्तार्घः प्राप्नोति लभते वेदान्। प्रमदाः स्त्रीः। पुत्रानपत्यानि च। तथा वैश्यो यथालाभमुपहृतार्घो गां लभते। शूद्रो भूरि बहु धनं वित्तं प्राप्नोति। सर्वे ब्राह्मणवैश्यशूद्रा रोगक्षयं गदोपशमं धर्मफलं च प्राप्नुवन्ति ।

अथोदितस्य लक्षणमाह-

**रोगान् करोति परुषः कपिलस्त्ववृष्टिं घूम्रो गवामशुभकृत् स्फुरणो भयाय।**

**माञ्जिष्ठरागसदृशः क्षुघमाहवांश्च कुर्यादणुश्च पुररोघमगस्त्यनामा।।१९।।**

**शातकुम्भसदृशः स्फटिकाभस्तपर्यन्निव महीं किरणौधैः।**

**दृश्यते यदि ततः प्रचुरान्ना मूर्भवत्यभयरोगजनाढ्या।।२०।।**

**उल्कया विनिहतः शिखिना वा क्षुद्भयं मरकमेव च घत्ते।**

**दृश्यते स किल हस्तगतेऽर्के रोहिणीमुपगतेऽस्तमुपैति।।२१।।**

उल्कया विनिहतोऽभितोडितः शिखिना केतुना वा विनिहतः। तदा क्षुभ्दयं दुर्भिक्षम्। मरकं जनक्षयं च विधते ददाति। किलेत्यागमसूचने। सोऽगस्त्यमुनिः हस्तगतेऽर्के हस्तस्थे सूर्ये दृश्यते उदयं याति। तथा रो़हिणीमुपगते रोहिण्यां संस्थितेऽर्केऽस्तमुपैति अदर्शनमायाति। यद्यप्यत्र गणितसाम्यं न भवति , तथाप्याऽऽचार्येण पूर्वशास्त्रदृष्टत्वात् कृतम्। तथा च पञ्चसिद्धान्तिकायाम् –

एवं पूर्वशास्त्रदृष्टत्वादाचार्येणात्रोक्तम्। तथा च पराशरः-

हस्तस्थे सवितर्युदेति रोहिणीसंस्थे प्रविशति -

अथास्य त्रिविधश्चारोदयकालो दृष्टः – आश्वयुग्बहुलाष्टमीपञ्चदश्योः कार्तिकाष्टम्यां वा। तत्राश्वयुग्बहुलोदितः सुवृष्टिक्षेमान्नसम्पत्करः। वर्णैश्चावेदयति। अग्निपरुषरूक्षाभो रोगाय कपिलो वृष्टिनिग्रहाय। धूमाभो गवामभावाय। माञ्जिठः कुङ्कमच्छविः क्षुच्छस्त्रदः। नीलोऽतिवर्षाय। संवृतः पुररोधाय। स्पन्दनो भयाय। अपि च -

# ११.सप्तर्षिचाराध्यायः

तत्रादावेव तेषां मुनीनां दिक्संस्थानलक्षणमाह-

**सैकावलीव राजती ससितोत्पलमालिनी सहासेव।**

**नाथवतीव च दिग्यैः कौबेरी सप्तभिर्मुनिभः।।१ ।।**

यैः सप्तभिर्मुनिभिः कौवेरी उत्तरा दिग् नाथवतीव च विराजते शोभते। यथा नाथवती प्रभुणा युक्ता नायिका विराजते तद्वत् कौवेरीति। नाथवती कीदृशी भवति। सैकावलीव। सह एकावल्या वर्तते या। एकावलीत्याभरणविशेषस्य संज्ञा। एवं ससितोत्पलमालिनी सहासेव। सह सितया श्वेतयोत्पलमालया वर्तते सह हासेन च। मुनिपङ्क्ते कुटिलत्वादेतानि विशेषणान्युप-पद्यन्त इति।

ध्रुववशाद् भ्रमद्भिर्यैरुतरा दिगेवंविधा लक्ष्यते तेषां चारं वक्ष्यामीत्याह-

**घ्रुवनायकोपदेशान्नरिनर्त्तीवोत्तरा भ्रमद्भिश्च।**

**यैश्चारमहं तेषां कथयिष्ये वृद्धगर्गमतात्।।२ ।।**

यैमुनिभिर्भ्रमद्भिरुतरा कौवेरी दिग् नरिनर्तीव। अत्यर्थ नृत्यति नरिनर्ति। कथं ध्रुवनायको-पदेशात्। ध्रुव एव नायको ध्रुवनायकस्तदुपदेशात्। यतो नर्तक्या उपदेशो नायक आचार्यो भवति। तस्या ध्रुवनायकोपदेशः। यस्मात् सकलज्योतिश्चक्रस्य ध्रुव एव भ्रामकः। तथा च भट्टब्रह्मगुप्तः-

तेषां मुनीनां चारमहं वृद्धगर्गमतात् कथयिष्ये। वृद्धगर्गो नाम महामुनिस्तन्मतात्तत्कृ-ताच्छस्त्रा-दिति।

अधुनैतेषां चारनक्षत्रानयनमाह-

**आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ।**

**षडद्विकपञ्चद्वियुतः शककालस्तस्य राज्ञश्च।।३ ।।**

मुनयो मीरच्यादयः सप्तर्षयो युधिष्ठिरे पाण्डुतनये नृपतौ राजनि पृथ्वी मही शासति परिपालयति मघासु मधानक्षत्रेष्वासन्नध्यतिष्ठन्। तथा च वृद्धगर्गः- **बृ.सं.,पृ-२५३**

तस्य च युधिष्ठिरस्य राज्ञः षड्द्विकपञ्चद्वियुतः शककालो गतः। सहस्त्रद्वयेन पञ्चभिः शतैः षड्विंशत्यधिकैः २५२६ शकनृपकालो युक्तः कार्यः। एवं कृते यद्भवति तावद्वर्षवृन्दं वर्तमानकालं यावद् गतम्। तस्य च शतेन भागमाहृत्य यदवाप्यते तानि नक्षत्राणि मघादीनि भुक्तानि यच्छेषं तानि वर्षाणि भुज्यमाने नक्षत्रे तेषां प्रविष्टानां गतानि। तानि च शताद्विशोध्य

यदवशिष्यते तावन्त्येव वर्षाणि तस्मिन्नक्षत्रे स्थितानीति। लब्धनक्षत्राणामपि सप्तविंशत्या भागमपहृत्यावशेषाङ्कसमं मघादिनक्षत्रं भुक्तमिति वाच्यम्।

अथ तेषां नक्षत्रभोगप्रमाणकालं नक्षत्रावस्थितं चाह-

**एकैकस्मिन्नृक्षे शतं शतं ते चरन्ति वर्षाणाम्।**

**प्रागुत्तरतश्चैते सदोदयन्ते समाध्वीकाः।।४।।**

**पूर्वे भागे भगवान् मरीचिरपरे स्थितो वसिष्ठोऽस्मात्।**

**तस्याङ्गिरास्ततोऽत्रिस्तस्यासन्नः पुलस्त्यश्च।।५।।**

**पुलहः क्रतुरिति भगवानासन्नानुक्रमेण पूर्वाद्याः।**

**तत्र वसिष्ठं मुनिवरमुपश्रितारुन्धती साध्वी।।६।।**

**उल्काशनिधूमाद्यैर्हता विवर्णा विरश्मयो -ह्रस्वाः।**

**हन्युः स्वं स्वं वर्गं विपुलाः स्निग्धाश्च तद्वद्ध्यै।।७।।**

**शकयवनदरदपारतकाम्बोजांस्तापसान् यवनोपेतान्।**

**हन्ति वसिष्ठोऽभिहतो विवृद्धिदो रश्मिसम्पन्नः।।८. ९।।**

**रक्षपिशाचदानवदैत्यमुजङ्गाः स्मृताः पुलस्त्यस्य।**

**पुलहस्य तु मलफलं क्रतोस्तु यज्ञाः सयज्ञभृतः।।१०. ११।।**

गन्धर्वा अश्वमुखा नरदेवयोनयः। देवाः सुराः। दानवा दनुपुत्राः। मन्त्राः। औषधयः। सिद्धा देवयोनयः। यक्षाः। नागा एतेषां सर्वेषाम्। तथा विद्याधराणां देवयोनीनां मरीचिरुप तप्तः पीडाकरः। स्निग्धो विपुलश्च वृद्धिप्रदः।

शीकयवनेति। शका जनाः। यवनाः दरदाः। पारताः। काम्बोजाः। तापसाः तपोनिरताः। वनोपेता वनस्था एतान् वस्ष्ठिोऽभिहत उपतप्तो हन्ति। रश्मिसम्पन्नो निरुपहोतो विवृद्धिदो वृद्धिप्रदः।

अङ्गिरस इति। ज्ञानयुता ज्ञानोपेताः। धीमन्तो बुद्धिमन्तः। ब्राह्मणा द्विजा। एते अङ्गिरसो विनिर्दिष्टाः कथिताः।

अत्रेरितिः। कान्तारमटवी। तत्र भवो जन्म येषां ते कान्तारभवाः। जलजानि। जले यानि द्रव्याणि जायन्ते। अम्भोनिधिः समुद्रः। सरितो नद्यः। एते अत्रेः।

राक्षसाः। पिशाचाः। दानवाः। दैत्याः। भुजङ्गाः सर्पाः। एते पुलस्त्यस्य स्मृताः कथिताः। मूलफलं यात्किञ्चित्तत्तु पुलहस्य। यज्ञा मखाः। यज्ञभृतो यज्ञकर्तारः। तैः सह यज्ञाः क्रतोरिति। तथा च वृद्धगर्गः-